# ☆ द्वितीयपरिच्छेदः..........(तत्कृतीनां वैशिष्ट्यम्)☆

पृष्ठानि


(२) द्वितीयपरिच्छेदः ..........( तत्कृतीनां वैशिष्ट्यम्)..........२६ तः ११५

(१) कालिदासकृतीनां साहित्यिकदृष्ट्या वैशिष्ट्यम् ।..........२६ तः ३८

(२) कालिदासकृतीनां सामाजिकदृष्ट्या वैशिष्ट्यम् ।..........३९ तः ५६

(३) कालिदासकृतीनां धार्मिकदृष्ट्या वैशिष्ट्यम् ।..........५७ तः ६६

(४) कालिदासकृतीनां राजनैतिकदृष्ट्या वैशिष्ट्यम् ।..........६७ तः ८२

(५) कालिदासकृतीनां भौगोलिकदृष्ट्या वैशिष्ट्यम् ।..........८३ तः ९९

(६) कालिदासकृतीनां पर्यावरणदृष्ट्या वैशिष्ट्यम् ।..........१०० तः ११५

Chapter-2

## द्वितीयपरिच्छेदः.......(तत्कृतीनां वैशिष्ट्यम्)

### (१) कालिदासकृतीनां साहित्यिकदृष्ट्या वैशिष्ट्यम्।

विश्वसाहित्ये संस्कृतसाहित्यमिव, संस्कृतसाहित्ये कालिदासस्य साहित्यम् महत्वपूर्णस्थानं भजते। अस्य कृतयः सप्त। ताश्च सप्तद्वीपांपृथिवीमनुकुर्वन्ति। अस्य कृतिषु मानवस्य महत्त्वपूर्णानि मूल्यानि सुरक्षितानि सन्ति। आसां कृतीनां साहित्यकदृष्ट्याऽपि न्यूनं महत्त्वं नास्ति। अतः साहित्यिकदृष्ट्या पर्यालोचनंकर्तुकामोऽहं यथामतिः साहित्यिकवैशिष्ट्यम् ग्रन्थाऽनुक्रमेण प्रस्तौमि।

### १. रघुवंशमहाकाव्यस्य वैशिष्ट्यम्।

रघुवंशमहाकाव्यं कालिदासस्यात्यन्तं प्रसिद्धं महाकाव्यमस्ति। अस्य भाषाऽतिसरलास्ति, येन साधारणसंस्कृतज्ञ आबालवृद्धोऽस्य रसास्वादं कर्तुं शक्नोति। एकोनविंशसर्गनिबद्धं कालिदासस्य महाकाव्यमिदं प्रथमाकृतिर्विद्यते। रामायणपुराणेषु च प्रसिद्धैव कथा यद्यप्यत्र वर्णिता। तथापि कालिदासस्य कविप्रतिभया यदभिनवं रुपं धृतं तस्य किमु वक्तव्यम्। अस्य ग्रन्थस्य साहित्यक्षेत्रे—अनेकधा वैशिष्ट्यं वर्तते, दिङ्मात्रोऽत्रप्रस्तूयते।

❖ **आख्यानवैशिष्ट्यम् –** कालिदास आख्याने सौरस्यसंयोजनेऽतिनिपुणः । एतदर्थ तेनालङ्काराः समाश्रिताः। वर्णनेषु तदीयकल्पनापरिधिर्निःसीम एव प्रतीयते। अन्तः पुरसेवकाः अजमीन्दुमतीसमीपं नयन्ति, तस्मिन् समयस्य सुषमा अस्मिनाख्यांशे द्रष्टव्याऽस्ति। तद्यथा—

**दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः।**
**वेलासकाशं स्फुटफेनराजिर्नवैरूदन्वानिव चन्द्रपादैः।।**[१]

अत्रऽपूर्वा एव रसपेशलता कविनाविर्भाविता। कुत्रचित् आख्यानेषु पुराणवचनानि अतिरञ्जितरूपेणोपस्थापितानि। तथाहि— कश्चिद्राजा युद्धे मृतः। सदिवं गच्छन् साप्सराः विमानात् स्वनृत्यत्कबन्धं रणभूमौ ददर्श। वर्णने चित्रात्मकता सर्वत्र दरीदृश्यते। आख्याने वास्तविकताया विस्रम्भं समुत्पादयितुं यथार्थविवरणानि कविना बहुशः प्रस्तुतानि। यथा रामलक्ष्मणौ विश्वामित्रं प्रणेमुरित्याख्याने। तद्यथा—

**तौ प्रणामचलकाकपक्षकौ भ्रातराववभृथाप्लुतो मुनिः।**
**आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना।।** [२]

---

१. रघुवंश –७/१९, २. – ११/३१

अस्मिन् श्लोके प्रणामचलकाकपक्षकाविति विशेषणं वास्तविकतायाः प्रतीति समुत्पादयति।

❖ **कालिदासस्य उपमावैशिष्ट्यम्–** कालिदासस्योपमाप्रयोगेऽपूर्वं वैशारद्यम् । उपमासु न केवलं रम्यता, यथार्थता, पूर्णता, विविधता च, अपि च सर्वत्रैव लिङ्गसाम्यमौचित्यं च। शतशः सन्त्युपमाप्रयोगस्थलानि तस्य काव्यादिषु। रघुवंशे तूपमाप्रयोगः सर्वातिशायि। महाकविः दीपशिखाकालिदासस्य नाम्नाप्रख्यातो बभूव। इन्दुमतीहस्ते वरमालामादाय यदा वरं वृणीतुमग्रे चचाल तदा समे राजानः सोत्कण्ठिता अभूवन्। इन्दुमती स्वयं सञ्चारिणी दीपशीखेव वर्तते, यस्याः समक्षे राजानः सप्रकाशाः भवन्ति। किन्तु यं यं राजानं सा व्यतियाय स स राजा तेनैव प्रकारेण नैराश्यमग्ना अभूवन् येन प्रकारेण दीपशिखायां निर्गतायां सत्यां मार्गाट्टाः विभावर्याः अन्धकारे निमग्ना भवन्ति। तद्यथा–

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतियाय पतिंवरा सा।**

**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।[१]**

मनुस्तथैव नृपाणामग्रिमोऽभवद्यथामन्त्राणामोंकारः। तद्यथा–

**आसीन्महीक्षितामाद्याः प्रणवश्छन्दसामिवं।।[२]**

सुदक्षिणा नन्दिन्यामार्गं तथैवगच्छद्यथा स्मृतिःश्रुतेरर्थम्। तद्यथा–

**श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।रघु.२/२।।**

यथा बुद्धेः कारणमव्यक्तं मूलप्रकृतिर्वा तथा सरय्वा नद्याः कारणं मानसं सरः। तद्यथा–

**ब्राह्मं सरः कारणमाप्तवाचो वृद्धेरिवाव्यक्तमुदाहरन्ति।।[३]**

दिलीपस्य कृतिविशेषाः प्राक्तनाः संस्कारा इव फलानुमेया आसन्। तद्यथा–

**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।रघु.१/२०**

यज्ञस्य दक्षिणेव सुदक्षिणा दिलीपभार्याऽभूत्। तद्यथा–

**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।[४]**

स्वाहया युक्तोऽग्निरिव वसिष्ठोऽरून्धत्यासमेत्तोऽभूतः। यथा–

**अन्वासितमरुन्वत्या स्वाहयेव हविर्भुजम्।।रघु.१/५६**

दिलीपानुगतानन्दिनी विधियुक्ता श्रद्धेव बभौ। तद्यथा–

---

१. रघुवंश – ६/६७, २. –१/११, ३. –१३/६०, ४. –१/३१

**बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना।।**[1]

रामादिभ्रातृचतुष्टयस्य विनीतत्त्वं तथैवावर्धत यथा हविषाग्निः।तद्यथा—

**मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम्।।**[2]

विद्याऽभ्यासेन यथा चकास्ति तथा नन्दिनी सेवया प्रसादनीया। तद्यथा—

**विद्यामभ्यसनेनेव प्रसादयितुमर्हसी।।रघु.१/८८**

प्रभावशक्तिर्मन्त्रशक्तिरुत्साहशक्तिश्चेतित्रयं यथाऽर्थमक्षयं सूतेतथा सुदक्षिणा पुत्रं रघुमसूत।तद्यथा—

**असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम्।।**[3]

## ❖ चरित्रचित्रणवैशिष्ट्यम्।

चरित्रचित्रणविषये कालिदासेन रघुवंशस्य प्रथमसर्गस्य पञ्चमश्लोकादष्टमं श्लोकं यावदुपस्थापितः। दिलीपादारभ्यातिथिपर्यन्तानां राज्ञां चरित्रं मानदण्डमेनमनुहरति।तद्यथा— **पृथिवीं शासतस्तस्य पाकशासनतेजसः, किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ।।**[4]

कविः स्वनायकानां सर्वगतं चारित्र्यनिदर्शनं दिग्विजयीरघुस्तस्य दृष्टौ महान् आसीद्। तद्यथा— **शरीरमात्रेण नरेन्द्र! तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।**

**आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।।**[5]

राजमार्गे विश्वामित्रेण सह गच्छतो रामस्योपरि मेघः पुष्पाणि ववर्ष। तद्यथा—

**यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम्।**

**तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः।।रघु.११/३।।**

## ❖ वर्णनकला – वैशिष्ट्यम्।

वर्णनेषु वस्तूना लोकोपकारकं स्वरूपं कालिदासेन सविशेषं प्रादर्शि। रघुवंशे समुद्रवर्णनप्रसङ्गे।

---

१. रघुवंश – १/६५,  २. –१/१६,  ३. –१३/३,  ४. –१०/१,  ५. –५/१५

तद्यथा— गर्भंधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि।

अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन।।रघु१३/४।।

महात्मान स्वानुभावेन प्रकृतिं कथं प्रभावयन्तीति पुनः पुनः कविना प्रदर्शितमस्ति। वनं गते दिलीपे वृक्षाः जयघोषमुदीरयामासुः,बाललताः पुष्पाण्यवाकिरन्, सीकरक्लिन्नश्च वायुस्तं निदाघतप्तमसेवत।तद्यथा—

शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने।।रघु.२/१४।।

पारम्परिकपवर्णनविषयातिरिक्तं शिशुवर्णनं कवेर्नितरां प्रियंबभूव। स्वकाव्ये जन्मोत्सवं यथकामं कालिदासो वर्णयति। रघुवंशस्य तृतीयसर्गे रघोः, पञ्चमेऽजस्याष्टमे दशरथस्य, दशमे रामादीनां च जन्मानि वर्णितानि। रघोर्जन्मः शुभसूचकं बभूव सर्वेषां कृते। तद्यथा— दिशः प्रसेदूर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे।

बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम्।।रघु.३/१४।।

सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम्।

न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि।।रघु.३/१९।।

कौत्समहर्षेराशीर्वादेन ब्राह्मे मुहूर्ते रघोर्महिषी पुत्ररत्नं प्रासुत।तद्यथा—

ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम्।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार।।[१]

❖ **गौरव वैशिष्ट्यम्**—रघुवंशकाव्यस्य नायकानां गौरवं साहित्यजगति प्रसिद्धमस्ति। काव्यस्यारम्भे रघुवंशस्य गुणगरिम्णा सह दिलीपस्ऽय वर्णनं काव्यमिदं समुन्नतपथंनयति। दिलीपस्य परोपकारित्वं यथा—

तं वेधा विदधे नूनं महाभूतसमाधिना। तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः।।[२]

अलंकाराणां सन्निवेशायप्रसङ्गवदलोकसामान्यपराक्रमाणां समुल्लेखं कुर्वन् महाकविः

---

१. रघुवंश – ५/३६ , २. – १/२९ रघु

स्वकाव्यगौरवं प्रायशः समुन्नयति। यथा—,

**प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः। पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः।।**[१]

काव्यगौरवं संवर्धयितुं महाकविः क्वचिदप्रासङ्गिकमपि महापुरुषाणां पराक्रमं निदर्शयति। इन्दुमती स्वयंवरे कार्तवीर्यवंशभवमनूपराजं वर्णयन्ती सुनन्दा त्रिषु पद्येषु कार्तवीर्यविरुदावलीं विशदयति। तथैव नरेशवर्णनेऽपि तत् कृताश्वमेधं तत्रोपस्थितस्यागस्त्यस्य चावदानं कविर्विवृणोति।

## ❖ आदर्श वैशिष्ट्यम्।

महाकविः कालिदासः राष्ट्रस्योच्चादर्शं प्रतिष्ठापयितुकामः स्वयमेव पराक्रमैकपरायणो बभूव। स दशरथ—राम—लक्ष्मणेषु विक्रमं ददर्श।तद्यथा—

**अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम्।**
**यमकुबेरजले॰ारवज्रिणां समधुरं मधुरञ्चितविक्रमम्।।**[२]

अत्र 'अञ्चित विक्रमम्' दशरथस्य विशेषणम्। रावणवधानन्तरं रामलक्ष्मणौ वर्णयन् कविर्वदति। तधथा—

**उभावुभाभ्यां प्रणतौ हतारि यथाक्रमं विक्रमशोभिनी तौ।**
**विस्पष्टमस्त्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात्।।**[३]

विक्रमस्य चर्चाऽपि कविना वारंवारं विहिता। तधथा—

**शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानम्।।रघु.१४/१८।।**

## ❖ काव्ये उपदेशवैशिष्ट्यम्।

महाकविः काव्येषु साक्षान्नोपदिशति, किन्तु व्यञ्जनया कुत्रचिदलङ्कारयोजनया च जनानां व्यक्तित्वविकासाय समुचितं पन्थानं सन्देशयति। तद्यथा—

**इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी।।रघु.४/६०।।**

जीवनस्य सार्थकतां परोपकारेण सम्भाव्यते। अनुपलब्धे सति परोपकारावसरे प्रतिप्रियमवश्यं करणीयम्। तद्यथा—

---

१. रघुवंश – ४/४०, २. – ९/२४, ३– १४/२

प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः।।

❖ काव्ये शैलीवैशिष्ट्यम्।

रघुवंशस्य नृपाणां चरित्रस्य वर्णने वीररसात्मकघटनानां वैशिष्ट्यं स्वभावतोः विलसति। अत एव क्षात्रधर्मेण राष्ट्रसुरक्षायाः परमं प्रयोजनं कविना प्रसाधितम्। रघुवंशस्याद्यसर्गद्वये प्रशान्तपरिवृत्तिः कविना सृष्टा यत्र हरिणा ऋषयोनन्दिनी गौश्च विद्यन्ते, तेषां मध्ये वीररसप्रतीकः सिंहः समागतः तथाप्यसौ मायाकृत एव बभूव। दिलीपः तस्याक्रमण प्रतीक्षमाणस्तस्थौ तदा स सिंहोऽन्तर्हितोऽभवत्। नन्दिनी चाह—

**उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।**
**ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम्।।**[१]

तृतीय—चतुर्थ—सप्तम—द्वाद्वशसर्गेषु युद्धवर्णनप्रसङ्गे वीररसो विलसति। सप्तमसर्गेऽजविलापप्रसङ्गः करुणरसं निष्पादयति। कालिदासस्य श्रृङ्गारप्रियता दशमसर्गे सविशेषं विलशति वसन्तवर्णनप्रसङ्गे। वसन्तस्तु कामसहचरः। मधुरेवासन्तिकपरिवृत्तौ कोकिलस्य कल्लोलकाकलीकलनपरस्य सन्देशः समुपस्थापितः महाकविना—

**त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः।**
**परभृताभिरितीव निवेदिते स्मरते रमते स्म वधूजनः।।**[२]

कालिदासस्य सदाप्रिया वैदर्भी रीति रघुवंशेऽनुत्तमं विलसति।तद्यथा—

**एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।**
**अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम्।।**[३]

❖ महाकाव्यत्वम्।

रघुवंशं न केवलं बृहत् काव्यमेव विशिष्यते अपितु काव्यत्त्वस्य चारुताप्यत्र वरेण्या। अनया दृष्ट्या महाकाव्यमस्योररीकरणीयम्।

## २. कुमारसम्भवमहाकाव्यस्य वैशिष्ट्यम्।

भारतीयपाश्चात्योभयदृष्ट्या कालिदासः संस्कृत — साहित्यस्य सर्वश्रेष्ठकलाकारः,

१. रघुवंश– २/६१, २. – ९/४७ , ३. – २/४७

सर्वमान्यकविश्च मन्यते। विश्वविख्यातस्यास्यैव प्रशस्तं महाकाव्यमस्ति 'कुमारसम्भवम्' नाम। यद्यप्यस्मिन् महाकाव्ये सप्तदशसर्गाः कालिदास विरचिता, अन्त्याश्च नवसर्गाः कालिदासोत्तरकालभवेन केषाञ्चित कविना सुरचित इति विदुषां मतम्। भाषासौष्ठवालंकृतशैलीश्लाघ्यरसपरिपाकजन्य विविध वैशिष्ट्यानि सन्ति। क्रमशोऽत्र प्रस्तूयते—

## ❖ चरित्रचित्रणदृष्ट्या वैशिष्ट्यम्।

अस्य महाकाव्यस्य नायकस्य महत्त्वंसंवर्धयितुं कालिदासो महत्तमविभूतिभिस्तस्यसाहचर्यं सम्पादयति। सप्तमसर्गे वरयात्राप्रस्थानावसरे सूर्यो विश्वकर्मणानिर्मितं छत्रं शिवस्योपरि धारयते स्म, गङ्गायमुने तदा चामरधारिण्यावभूताम्,विष्णुब्रह्माणौ च जयघोषं चक्रतुः, इन्द्रादयोः लोकपाला शंकरं साञ्जलि प्रणमन्तिस्म। कुमारसम्भवे—

**उपाददे तस्य सहस्त्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम्।**
**स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे।।**
**मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम्।**
**समुद्रगारुपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे।।**
**तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्।**
**जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम्।।**
**तं लोकपालाः पुरुहूतमुख्याः श्रीलक्ष्मणोत्सर्गविनीतवेषाः।**
**दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः।।**[1]

## ❖ नायिका वैशिष्ट्यम्।

अस्मिन् 'कुमारसम्भवम्' महाकाव्ये नायकस्तु विरक्तोवर्तते, सांसारिकजीवने रतिर्नास्ति, किन्तु नायिका नायकं प्राप्तुं सततं प्रयत्नशीला दृश्यते।

**तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।**
**स्त्रीसन्नीकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः।।**[2]

प्रायशः अन्यकाव्येषु नायक एव नायिकांप्राप्तुमऽधिकतरं प्रयतते। तानिकाव्यानि नायकप्रधानानि सन्ति। कुमारसम्भवे तु नायिका नायकं प्राप्तुं सचेष्टा विद्यते। अतः एतत् काव्यं नायिका प्रधानं विद्यते। शिवप्राप्ति समुद्योगे बारंबारं निष्फलापि नायिका नैराश्यं न भजते। सा सामान्यकुमारीव प्रेममार्गानभिज्ञा नास्ति। नायकं वशिकर्तुं चित्तभावानुभावादीनां

१. कुमारसम्भव – ७/४१, ४२, ४३, ४५ ,        २.कुमारसम्भव – ३/७४,

प्रयोगं साऽकरोत्। तद्यथा—

विवृण्वती शैलसुतापि भावभङ्गैः स्फुरद्बालकदम्बकल्पैः।

साचीकृता चारुतरेण तस्थौ मुखेन पर्यसतविलोचनेन।।कुमा.३/६८।।

### ❖ कुमारसम्भवेऽलंकारवैशिष्ट्यम्।

महाकविः कालिदासेनापूर्वालंकारविधानं यत्रतत्रप्रदर्शिमस्ति। पार्वत्या मुखंसदैव कमलविकासचन्द्रकान्तिसम्पन्नं प्रदशयितुं कविना प्रतिपादितम्—

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।

उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः।।[१]

पञ्चमसर्गेऽपि यत्रतत्रालंकारयोजना वैशिष्ट्यं प्रदर्शितमस्ति कविना—

मनीषिताः सन्ति गृहेषु देवताः तपः क्व वत्से क्व च तावकं वपुः।

पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः।।कुमा.५/४।।

अत्र दृष्टान्तालंकारो वर्तते।

कालिदासीया उपमाऽनुत्तमा इति सर्वसम्मतम्। तदीयोपमानानि नितरां सामञ्जस्यपूर्णानि रुचिराणि च प्रतिभान्ति। तथाहि—

तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।

अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः।।[२]

अत्र देवानामुदयाय कामस्य नितरामपरिहार्यत्वं प्रतिपादयितुं बीजाङ्कुर — जल — सम्बन्धस्योदाहरणं सर्वथा समीचीनम्। अर्थान्तर—व्यतिरेकादीनां प्रयोगेऽपि पटुत्वं कविना—आविष्कृतम्।तद्यथा—

अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्।

एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः।।[३]

अत्र अर्थान्तरन्यासः। अस्मिन् हि काव्ये महाकाव्यानां लक्षणानि समीचीनतया चरितार्थतां गतान्यवलोक्यन्ते। भाषायाः रमणीयता, भावानां—गाम्भीर्यम्, छन्दसाम् औचित्यम्, रसानां च सरसपरिपाकः परिपूर्णतामवगाहते। मदनदहनानन्तरं वर्णितो हृदयद्रावको रतिविलापः काव्यरसिकानां कृते परमाकर्षकोऽस्ति। काव्येऽस्मिन् प्रधानरसः शृङ्गारो वर्तते, करुणशान्तरसौ च तत्सख्यौ स्तः। काव्यस्यास्य भाषा सरला सालंकारा च वर्तते। नूनं भारतीयसंस्कृतेः तदीय प्राचीनपरम्परायाश्च किमपि सहृदयहृदयावर्जकं निरूपणम् अन्यत्र नोपलभ्यते। एतदस्य महाकाव्यस्य वैशिष्ट्यं वर्तते।

---

१.कुमारसम्भव – १/४३, २. – ३/१८, ३. – १/३

## ३.साहित्यकदृष्ट्या मेघदूतस्य वैशिष्ट्यम्।

मेघदूतखण्डकाव्यमेकमुत्कृष्टं गीतिकाव्यमस्तीति विद्वासो मन्यन्ते। अन्येषु काव्येषु मध्ये काव्यमिदं सिंहगर्जनां करोति। ध्वनिप्रधानमेतत्काव्यम्। अस्मिन्काव्ये भारतदेशस्य भौगोलिकं चित्रमुपवर्णितमस्ति। एतत्काव्यमधीत्य गृहैव जनाः सर्वदेशपरिचिताः भवन्ति। एतस्य महत्वं वैदेशिकाः अपि विद्वान्सः स्वीकुर्वन्ति। एतो हि अस्यानुवादः विविधदेशीयभाषासु समभवत्। एतेनवास्य लोकप्रियता ज्ञायते।

मेघदूतद्वारा भौतिकवादधर्मसन्ताप्तानां जनानां छायाप्रदानं कृत्वां कामनावर्षणं कृतमस्ति। सुकुमारो मार्गः, वैदर्भीरीतिः माधुर्यप्रसादो वा गुणः स्वयमाकर्षति मनांसि काव्यरसिकानां जनानाम्। अत्रत्योपमोत्प्रेक्षा काव्यलिंगाद्यालंकाराः प्रतिपादिताः सन्ति अर्थान्तरन्यासस्तु किमपि विशिष्टमेव महत्वं
स्थापयति सहृदयानां हृदये। तधथा–

**जातं वंशे भुवन विदिते पुष्करावर्तकानां, जानामि त्वां प्रकृतिपुरुषं कामरुपं मघोन।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं, याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।।**

एवं स्वकीयकाव्यगुणैर्नुतनविद्या प्रवर्तकत्वेन च मेघदूतस्य वैशिष्ट्यम् स्पष्टमेव दरीदृश्यतेतराम्।।

## ४.ऋतुसंहारस्य साहित्यिकवैशिष्ट्यम्।

ऋतुसंहारकाव्यं कालिदासस्य प्रथमा काव्यकृतिरस्ति। षट्सर्गात्मकं ऋतुसंहारं नाम गीतिकाव्यं महाकवि कालिदासेनोद्यत्तारुण्यकाले कदाचिद् विरचितमित्ति प्रत्तीयते। अस्यां प्रारम्भिकृतावपि तस्य महती पर्यवेक्षण शक्तिः प्रसाद गुणेन वर्णनचातुरी च परमालोक्यते । तस्य प्रकृत्या सह संवेदना, सूक्ष्मा पर्यवेक्षकस्य ईक्षिका, भारतीयप्राकृतिकदृश्यानां च विशदर्वणनचातुरी काव्येनानेन स्फुरी क्रियते। काव्येऽस्मिन्नायको नायिकां सम्बोधन्नृतूनां प्रायशः प्रागल्भ्यं प्रस्तौति। अन्यत्र च कविस्तान् सहृदयान् रसिकान्सम्बोधयति, येषां कृते स समग्रं नैसर्गिकमैश्वर्यं पूर्व नियोजितमेवसन्धारयति। एतादृशे काव्यव्यापारे श्रृङ्गारस्यौदात्यं स्वाभाविकमेव सम्प्रवर्तित्तम्।

## ५.शाकुन्तलस्य साहित्यिकवैशिष्ट्यम्।

महाकवेः सप्तकृतिषु शाकुन्तलमेव कवेः प्रतिभायाः परिपाकेन, रचनाकौशलेन, प्रकृतिचित्रणपाटवेन, रसपरिपाकेन, नीरसाख्याने सरसताऽऽधानेन,

मूलकथापरिवर्तने वैशारद्येन, करुणादिरससंचारेण च सर्वातिशायीति तदेव कालिदासस्य सर्वस्वाभिमन्यते। कालिदासस्य नाट्यकलाकौशले सन्त्येते विशेषाः। घटनासंयोजने सौष्ठवं, वर्णनानां सार्थकता स्वाभाविकता, ध्वन्यात्मकता च, चरित्रचित्रणे वैयक्तिकत्वं, कवित्वं रसपरिपाकश्चेति।

**घटनासंयोजने वैशिष्ट्यं यथा—** द्वितीयेऽङ्के आश्रमं प्रवेष्टुकामे सति दुष्यन्ते ऋषिकुमारद्वयस्यनृपाह्वानार्थं प्रवेशः। पञ्चमे हंसपदिकागीतम्, षष्ठेऽङ्गुलीयकोपलब्धिः ,सप्तमे पुत्रदर्शनं, शकुन्तलावाप्तिश्च।

**वर्णनेषु स्वाभाविकता—** प्रथमोऽङ्के मृगप्लुतिवर्णनम्, चतुर्थे शकुन्तलाविप्रयोगवर्णनम्। पञ्चमे शकुन्तलाप्रत्याख्यानम् । वर्णनानां ध्वन्यात्मक वैशिष्ट्यं यथा—"**दिवसाः परिणामरमणीयाः।**" अभि. – १/३

अत्र नाटकस्य सुखावसायित्वं सूचयति। रसनिरूपेणेऽपि महती विदग्धताऽवाप्यते। बीभत्सरसं विहायप्रायः समेऽप्यन्ये रसाः समुपलभ्यन्तेऽत्र। श्रृङ्गाररसस्य वर्णनम्अधिकं वर्तते।तद्यथा— शकुन्तलां समीक्ष्य नृपोक्तिः— **अहो मधुरसमासां दर्शनम्। पृ. ४२**

**इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।**[१]

कालिदासो वेदर्भीरीत्याः सर्वाग्रणीः कविरित्यत्र न कस्यापि विप्रतिपत्तिः। तस्य शैल्यां प्रसादभाधुर्यौजसां त्रयाणामपिगुणानां समन्वयोऽवलोक्यते। प्रसादगुणो यथा—

**"सरसिजमनुविद्धं शैवलेनापि रम्यम्।"**[२]

ओजो गुणो यथा— **"तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः।"**[३]

तस्यभषायामसाधारणोऽधिकारः। मनोज्ञान् भावान् मधुरैः शब्दैः अभिव्यनक्ति। तद्यथा—

**"अनाघ्रातं पुष्पं किसलयमलूनंकररुहैः।"**[४]

## ❖ शाकुन्तले श्रेष्ठतत्त्वानि।

अभिज्ञानशाकुन्तलस्य कथानक एव कानिचित् श्रेष्ठतत्त्वानि सन्ति, यानि कथानकमिदं जनमानसतन्त्र्या संवादयन्ति। चतुर्थाऽङ्के कन्यायाः पतिगृहप्रस्थानस्य

---

१ अभिज्ञानशाकुन्तल.– १/१८, २. –१/२० ३. – १/३३, ४. – २/१०,

कारुणिकतमो विशालस्तरीयश्च वृतान्तः सर्वोत्तमो विद्यते। 'तत्राऽपि च चतुर्थोऽङ्कः' इति ख्यातस्य चतुर्थाङ्कस्य श्रेष्ठत्वे सर्वप्रथमकारणमिदमेव प्रतिभाति। कण्वेन वनस्पतिभ्यः कुसुमाहरणमेव केवलमादिष्टम्। वनस्पतिभिस्तु क्षौमादीनि वनदेवताभिराभरणानि च प्रदत्तानि। तद्यथा—**क्षौमंकेनचिदिन्दुपाण्डतरुणा माङ्गल्यमाविष्कृतम्**

**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।**

**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै—**

**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्दिभिः।।अभि.४/४।।** [५]

अर्थात्— महर्षेः कण्वस्य निदेशवर्तिना केनचिद् वृक्षेण चन्द्रधवलपदांशुकं प्रदत्तम्। केनचिद् स्त्रीणां चरणरञ्जनोपयुक्तं लाक्षाद्रव उद्गीर्णः तथाअपरेभ्यो पल्लवरागताम्रेभ्यः वनदेवताकरतलेभ्यः विभिन्नानि महर्घाणि तपः प्रभावातिशयः। अभिज्ञान शाकुन्तले सर्वं खलु श्रेष्ठं दृश्यते, एतदेव शाकुन्तलस्य वैशिष्ट्यं वर्तते।

## ६. विक्रमोर्वशीयम् नाटकस्य साहित्यिकवैशिष्ट्यम्।

विक्रमोर्वशीयं कालिदासस्य द्वितीयं रूपकमस्ति। अस्य नायकःपुरूरवा स्वविक्रमेण नायिकामुर्वशीं प्राप्तवान्। अत एव विक्रमोर्वशीयनाम सार्थकम्।

विक्रमोर्वशीयाख्याने कतिपये कलात्मकाविशेषाः सन्ति। प्रथमं प्रत्यक्षरूपेण श्राव्याणां वृत्तान्तानां विटपान्तरितेन तिरस्कारिणी प्रतिच्छन्नेन वा पात्रेण श्रवणम्। अस्मिन्नाटके नायका दिव्यादिव्या सन्ति।

उर्वश्या मिलनात् प्राग् नायकः पुरूरवाः पराक्रमी राजा विद्यते। नायिकाया योगे तु स भावुकप्रणयी सञ्जातः। महाराज्ञीं प्रसादयितुं स आत्मानं दासी करोति। तद्यथा—

**अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात्।**
**सेव्योजनश्च कुपितः कथं नु दासो निरपराधः।।**[१]

विक्रमोर्वशीयं कालिदासस्य शिल्पकलाप्रियतां सुष्ठु प्रमाणयति। अस्मिन् रूपके चित्रलेखेत्युर्वश्याः सख्या नाम कवेश्चित्रप्रवणतायाः परिचायकमस्ति। अस्मिन् रुपके वर्णितानि अलौकिकतत्त्वानि सामञ्जस्यं नार्हन्ति। कतिचिद्देवोचितकार्यकलापा अनभिनेयाः सन्ति। उर्वशी

१. अभिज्ञानशाकुन्तल –२/२०,

नारदादीनां वायुलोके विचरणममानुषिकमेव। एतेषां दिव्यपात्राणां सङ्गतो गन्धमादनान्निवर्तमानः पुरूरवा अपि नभोगामीभवितुकामः। तद्यथा—

**अचिरप्रभाविलसितैः पताकिना सुरकार्मुकाभिनवचित्रशोभिना।**

**गमितेन खेलगमने विमानतां नय मां नवेन वसतिं पयोमुचा।।**[१]

## ७.'मालविकाग्निमित्रम्' नाटकस्य वैशिष्ट्यम्।

कालिदासरूपकेषु प्रथमा कृति(नाटकं) इत्यत्र न कोऽपि सन्देहः। अत्र हि रूपके साधरणकथामुपादाय रमणीय किमपि कथानकं प्रकल्पितं विलोक्यते। अस्य नाटकस्य भाषा प्रसादपूर्णा मनोहरा चास्ति। अत्र कुत्रापि क्लिष्टता कृत्रिमता वा नानुभूयते। यद्यपि कालिदासस्य प्रथमेनाटकेऽस्मिन्नलंकाराणां प्रयुक्तानां नास्त्याधिक्यम्, तथाऽप्यत्र प्रयुक्तालंकारेषु अनुप्रासोपमाश्लेषाद्यलंकाराणां चमत्कारो नूनमेव सहृदयचित्तह्लादकः प्रतिभाति।

## निष्कर्षः—

महाकविः कालिदासग्रन्थानां सम्यगनुशीलनेन विविध प्रकाराणि तद्वैशिष्ट्यानि अवलोक्यन्ते। भवभूति—बाणभट्टादि—इतरकविग्रन्थेभ्यः कालिदासग्रन्थेषु महदेकमन्तरं पाठकानां समक्षमभिलभ्यते। उरसि कस्या अपि रम्यकल्पनायाः समागमनेनान्यकवयस्तु तस्या विस्तृतवर्णनं कुर्वन्ति। परन्तु कालिदासः कतिपयेषु संयमितशब्देष्वेव तद्रेखाचित्रं निर्माय तत्रत य रंजनक्रियाभारं पाठकानां सह्रदयतोपरि निःक्षिपति। अतः कालिदास काव्यानि 'क्षणेक्षणे यन्नवतामुपैति' इति रमणीयत्वनिकषे पूर्णतः सिद्धानि सफलानि च प्रतीयन्ते। एवं तदध्ययनानुशीलन समये पाठकानां ह्रदये न कदाप्युत्कण्ठाह्रासो रुच्यभावो वानुभूयते। उदाहरणार्थं वयं पस्यामो यन्मदनदाहानन्तरं वसन्तं दृष्ट्वा रतिदुखं द्विगुणितं संजातम्। भावमिममभिव्यंजयितुं दुःखसयानिवार्यप्रवाहसूचकमेकं लघुवाक्यमेव प्रयुक्तवान्—'**स्वजनस्य हि दुःखमग्रतो विवृत द्वारमिवोपजायते**।' किन्त्वेतादृशे एवैकत्र प्रसङ्गे भवभूतिना विविधालंकारैरलंकृत्येकः पूर्ण श्लोको लिखितः। तद्यथा—

**सन्तानवाहिन्यपि मानुषाणां दुःखानि सद्बन्धु वियोगजानि।**
**दृष्टे जने प्रेयसि दुःसहानि स्रोतः सहस्रैरिव संप्लवन्ते।।**[२]

---

१. अभिज्ञानशाकुन्तल—४/३७, २. उत्तरराम चरितम् —४/८

मालविकाग्निमित्रनाटकस्य संविधानकमुपस्थापयन् कविरिरावत्या अतिचमत्कारकं किन्त्वनावश्यकं नृत्यप्रसङ्गं महता संयमेन कौशलेन चोपेक्षितवान्। एतादृशप्रसङ्गैः कवेरुत्कृष्टसंयमः प्रतीयते प्रशंसनीया कलाभिज्ञता च।

रीतिनां मध्ये वैदर्भी रीतिरेव सर्वश्रेष्ठा रीतिर्मन्यते। अस्या एव सर्वश्रेष्ठाया रीतेः प्राधान्यं कालिदासकाव्येष्ववलोक्यते। पुराणानामनलंकृता स्वभावसरला कालिदासोत्तरभाविनां कवीनामलंकारभारपीडिता च दुष्करा या शैली तयोर्मध्यमार्गगामिनी सहजसुन्दरा नान्यैस्सुलभा परिमितभूषणभूषिता कापि तस्य विशिष्टा शैली दृश्यते। यद्यपि च कालिदासकाव्येषु यत्र तत्र भासकाव्यव्यापी प्रसादगुणातिशयोऽपि लभ्यते, तथाप्यस्ति तत्रापि कोऽप्यदभुतोविच्छित्तिविशेषः चमत्कारः। अलंकारेषु प्रधानत उपमायमकानुप्रासार्थान्तन्यासालंकारैः सुष्ठ्वलंकृतानि कालिदासकाव्यानि विद्यन्ते।

कालिदासकाव्यानि सर्वथा बहूनामन्यकवीनां मार्गदर्शकायमानानि तावदभूवन्। तथाहि, 'मेघदूतंवत्सभटिनानुकृतम्' सति तावदुत्तरम्। मालविकाग्निमित्रमनुसरता हर्षेण नाटिका द्वयं रचितम्। भवभूतिरात्मनो मालतीमाधवे कालिदासमनुयाति। दण्डिवामनादयोऽपि प्राचीनालंकारिकाः तत्प्रबन्धेभ्योः बहुश उदाहरन्ति। श्रृंगारकरुणरसयोरुत्कृष्टपरिपाकसमन्वितानि विविधप्रकारविनोदपरिहासोपहासनिष्ठानि कालिदासकाव्यानि सर्वदैव नूतनानि चमत्कारपूर्णानि सर्वजनाकर्षकाणि च विद्यन्ते। कालिदासात्पश्चाद्वर्तिनोऽर्वाचीनालंकारिका मम्मटविश्वनाथादयः, कालिदासस्य—

**काप्यभिख्या तयोरासीद् ब्रजतोः शुद्धवेषयोः।**
**हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।रघु. १/४६।।**

अस्मिन् रघुवंशीयपदे भग्नप्रक्रमत्वंदोषः।(का.प्र.)

कुमारसम्भवस्य—"**तद्गच्छ सिद्धयै कुरुदेवकार्यम्।।"३/१८।।** अत्र द्धयै पदांशे श्रुतिकटुत्वंदोषः। (सा.द. ७/ पृ.२३४) अभिज्ञानशाकुन्तलस्य— "**नवमालिका कुसुमपेलवा।" १/ पृ.३२** । अत्र पेलवशब्दस्याद्याक्षरे अश्लीलदोषः। (सा. द. ७/पृ.२३४) उपर्युक्तदोषाः निर्दिशन्ति। किन्तु यदि कालिदासस्य विशालग्रन्थसम्पत्तया तेषां दोषाणां तुलना क्रियते तदा तेऽत्यल्पाः सारहीनाश्च प्रतीयन्ते। कवेर्ग्रन्थानां गुणसन्निपाते ते दोषाः निमज्जन्ति तिरोहिता वा जायन्ते। अत एव कालिदासीयग्रन्थानां सम्यगनुशीलनानन्तरं सुस्पष्टमिदं प्रतियते यत्तत्काव्यवैशिष्ट्यं सर्वथानुपममवर्णनीयं चास्तीति।

## २.कालिदासकृतीनां सामाजिकदृष्ट्या वैशिष्ट्यम्।

मनुस्मृत्यानुसारेण सृष्टिः सञ्जाता तदातः अद्यावधि पर्यन्तं समाजविषयकं वर्णादिनिर्धारणचर्चा मिमांसा च समये समये विद्वद्भिः प्रस्तूताः, तथापि नैकमतं प्रतीयते, यतो हि नैकपक्षाः अस्मिन् विषये यथा–सनातनधर्मावलम्बिनः, वेदादारभ्यः अद्यावधि वर्णव्यवस्थायाः आश्रमव्यवस्थाश्च वेदानुसारेणैव स्वीक्रियते। अन्ये च वेदाद्भूतनिर्णयमनुश्रृत्य नैवमन्यते जातिभेदाः। तृतीयेतरपक्षाः न वेदाः मन्यन्ते न जातिभेदाः मन्यन्ते, एते तु वैदेशिकाः। चतुर्थे हि संदिग्धाः सांप्रदायिकाश्च, एतेषां सर्वेषां पक्षे सामाजिक व्यवस्थाया स्वरूपनिर्धारणं नाशक्यं किन्तु दुस्तरमिति। संस्कृतवाङ्मये अनेके कवयः तत् तत् कालीनाः सामाजिकव्यवस्था स्वकीयेषु काव्यादिषु वर्णनं क्रियन्ते स्म। केचित्तु वेदानुसारेणैव व्यवस्थापक्षे निर्दिष्टाः तेषांमन्यतमं कालिदासः। तेन स्वयमेव उक्तम् **"कथितं पूर्वसूरिभिः"**।

एतदनुसारेण सामाजिक निदर्शनं तत्कालीनस्य अत्र एतद् ग्रन्थेषु सर्वत्र दृष्टिगोचरं भवति। वेदविहीत वर्णाश्रमव्यवस्थायाः स्मृतिग्रन्थोक्तव्यवस्था वर्णनमत्र दरीदृश्यते। अनेन कारणेन चिन्मयसमाजे मृण्मयसमाजे च या काचित् विशेषता वर्तते तद् वैशिष्टयमनुसृत्य कालीदासीय ग्रन्थाधारेण अत्र मया समाजस्य अनेकविधरुपेण विभज्य तद्वैशिष्टयं विलिखितमिति तद्यथा क्रमं संचित्य निर्दिश्यते। महाकविः कालिदासस्य ग्रन्थेषु पृथक् पृथक समाजस्य रूपरेखा प्राप्यते। महाकवेः स्वरचनासु भारतीयजनानां सामाजीकजीवनस्य दर्शनं भवति। अतः कालिदासं स्वयुगस्य प्रतिबिम्बमपि कथयितुं शक्यते। महाकवेः सामाजिकवैशिष्ट्यवर्णनप्रसंङ्गे सम्यक् परिशीलनार्थं सामाजिकविधानां वर्गीकरणमावश्यकम्। अतः निम्नप्रकारेण समाजस्य विभाजनं कर्तुं शक्यते। तद्यथा–

१.सामाजिकव्यवस्था, २.वर्णव्यवस्था, ३.वर्णकर्मव्यवस्था, ४. मानवजीवने–अवस्थाऽनुसारेण–आश्रमव्यवस्था, ५.विवाहप्रकाराः, ६.कालिदाससमये शासनव्यवस्था, ७.कालिदाससमये पुत्रस्यमहत्वम्, ८.कालिदाससमये भोजनखाद्यान्न प्रकाराः, ९.कालिदासकाले शृङ्गारोपकरणानि च।

१.सामाजिकव्यवस्था ।

महाकविः कालिदासयुगे समाजस्य संरचना पारम्परिक ब्राहमण—क्षत्रीय—वैश्य—शूद्र चत्वारवर्णेषु विभक्ता आसीत्। अस्य वर्णचतुष्टयविषये रघुवंशे—**पूर्वस्तयोरात्मसमे चिरोढामात्मोद्भवे वर्णचतुष्टयस्य।**

**धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकम्।।रघु.१८/१२।।**

वर्णानां विषये शाकुन्तलनाटके—

**महाभागः कामं नरपतिरभिन्नस्थितिरहो, न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।**
**तथापीदं शश्वत्परिचितविविक्तेन मनसा, जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव।।**[१]

वर्णाश्रमाणां विषये रघुवंशे—

**ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय।**

**वर्णश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे।।**[२]

अन्यच्च— **नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः।**

**निर्वासिताऽप्येवमतस्त्वयाऽहं तपस्विसामान्यमवेक्षणीया।। रघु।।**

व्याधयः, धीवराः, चाण्डालतुल्य अन्यजनैर्निर्मितः पञ्चमवर्गस्याऽपि उल्लेखो वर्तते।

**श्वगणिवगुरिकैः प्रथमस्थितं व्यपगतानलदस्यु विवेश सः।**

**स्थिरतुरङ्गमभूमि निपानवन्मृगवयोगवयोपचितं वनम्।।**[३]

अभिज्ञानशाकुन्तले—धीवरः वदति —**"अहं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।"६.पृ.२८३।।**

**"अर्थशास्त्र – शुक्रनीत्योरनुसारेणाऽस्य पञ्चमवर्गस्यलोकानगरस्य प्राचीराणां बहिर्निवसन्तिस्म।"** [४]

उपर्युक्त त्रिवर्गाणां(ब्राहमण—क्षत्रिय—वैश्याः) लाक्षणिकनामद्विजरासीत्। यतः तेषांम्

---

१. अभिज्ञानशाकुन्तल – ५/१०, २. रघुवंश – ५/१९, ३.–९/५३, ४.कालिदासका भारत भाग—२, पृ.४९

उपनयनसंस्कारानन्तरं द्वितीयजन्मेति मन्यते। सः(द्वितीयजन्मा) राजा वर्णाश्रमाणां रक्षकः, तथा प्रजानां न्याय—धार्मिकाऽऽचरणविषयेध्यानं ददातिस्म। नृपस्याऽस्य विशिष्टयोग्यताकारणेन तं रथवाहकः "नियन्तु :" इत्युपाधिः प्राप्ताऽऽसीत्। सः धर्मरथस्यसञ्चालकः आसीत्। तस्य प्रजाः तस्मिन् रथे नियोजितारासन्। अतः ते धर्मपथात् रेखामात्रमपि विचलितंनैव भवन्ति स्म।

**रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।**

**न व्यतीयुः प्रजातस्य नियन्तुर्नेमिवृत्तयः।।रघु.१/१७।।**

अर्थात्—यथा निपुण सारथिसञ्चालिता रथचक्रधाराः पूर्वक्षुण्णसरणिं न जहर्ति, तथैव तस्य दिलीपस्य प्रजा अपि पूर्वाभ्यस्तांमनूपदिष्टामाचारपद्धति न तत्यजुः।

**२. वर्णव्यवस्था।**

धर्मशास्त्रैः प्रतिपादित आचारधर्मपरिपालने प्रजाः श्रद्धाभावसमन्वितारासन्। यद्यपि कालिदासस्य स्वत्रन्त्र—प्रसन्न—सौन्दर्योपासकसमाजे—असंयमशीलानामभावः न आसीत्, यतः "मालविकाग्निमित्रम्" नाटके एकः सेनाध्यक्षस्य प्रसङ्गोऽस्मान्मिलति, यः मिश्रितवर्णोत्पन्नरासीत्। तथापि— उपर्युक्ताऽऽदर्शस्य रक्षार्थं नृपः स्वप्रजयासह सततं प्रयत्नशीलो दृश्यते स्म। वर्णव्यवस्थान्तर्गतनियमानामुलङ्घनम् अत्यल्पं भवति स्म, तथा नियमोनङ्घनकर्तृन्जनान् दमयितुं राजा सावधानो भवति स्म। रघुवंशे—

**राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते।तमन्विष्य प्रशमयेर्भवितासि ततः कृती।।**

**इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियाम्।दिशः पपात पत्त्रेण वेगनिष्कम्पकेतुना।।**

**अथ धूमाभिताम्राक्षं वृक्षशाखाऽवलम्बिनम्।ददर्श कश्चिदैक्ष्वाकुस्तपस्यन्तमधोमुखम्।।**[१]

समाजनायकाः स्ववंशशुद्धयर्थ सन्तति विषये चिन्तिताः भवन्ति स्म, तथा ये नियमोऽलङ्घनं कुर्वन्ति, तान् दण्डमपि ददतिस्म। रघुवंशे—

**लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।।**[२]

अर्थात्— पुण्यं केवलं परलोके सुखावहम्, परन्तु सन्ततिस्तूभयलोकमध्ये सुखकरि, अतः पुण्यापेक्षया सन्ततेरेवाधिकसुखास्पदत्वम्। अन्यच्च — दण्डविषये—

१. रघुवंश — १५/४७, ४८, ४९, २. — १/६१,

**कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम्।**

**तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना।।रघु.१५/५३।।**

अतः कालिदासः वर्णाश्रमधर्मस्य पृष्ठपोषको ज्ञायते। त्रिषुगुणेषु श्रेष्ठः सत्वगुणसम्पन्नः वर्णश्रेष्ठः ब्राह्मणः मन्यते स्म, तथा द्वितीयगुणः रजसः अधिकारी आसीत्। क्षत्रियवर्णः द्वितीयवर्गे आगच्छति स्म। श्री रामस्य शूरतावर्णनप्रसङ्गे परशुरामः स्वयं निजमुखेन श्री रामं प्रशंसति। रघुवंशे– **राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा।**

**नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः।।**[1]

'**क्षतो नाशत् त्रायत्इति क्षत्त्रः**' इति क्षत्रियनाम्नः व्युत्पत्यर्थको व्याख्या भवति, एतां व्युत्पत्तिं कविरर्थतोऽनुक्रमति क्षतादित्यादिना। लोकव्यवहारेऽपि – अयमर्थः प्रसिद्धोऽस्ति। यथा– रघुवंशे– **क्षतात्किल त्रायत इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेशु रूढः।**

**राज्येन किं तद्विपरीतवृत्तेः प्राणेरुपक्रोशमलीमसैर्वा।।**[2]

अर्थात– संसारे विपदग्रस्तस्य रक्षक एव वस्तुतः क्षत्रियः अतः स्वधर्माचरणरहितस्य क्षत्रियस्य राज्यं जीवनञ्च निन्दिततया व्यर्थमेव।

### ३.वर्णकर्मव्यवस्था ।

जीवनस्य सामान्ययात्रायां चतुर्वर्णानां जनाः स्व स्व कर्माऽनुसरणं कुर्वन्ति स्म। कोऽपि जनः अभद्रव्यवसायमपि घृणया नैव पश्यन्ति स्म, यद्यपि यदा कदा एतादृशव्यवसायसम्बन्धे उच्चवर्ण्सस्य – उपहासात्मकः प्रवृतिर्मिलति। अभिज्ञानशाकुन्तले एकः प्रहरी संभवतः क्षत्रियवर्णः आसीत्, सः धीवरस्य व्यवसाये अभद्रव्यवहारं करोति, परन्तु धीवरः स्व व्यवसायः– औचित्यपूर्णोऽस्तीति निर्भयतापूर्वकं प्रतिपादयति। धीवरः तर्कयति यत् अहं जालोद्गालादिव्यवसायः करोमि, जातितः ममप्रकृतिः क्रूरोनास्ति। एतद् व्यवसायः जन्मतः मम जीविका साधनमस्ति। अतः ममकृते सहजकार्यं वर्तते तस्य पालनं कर्तव्योऽस्ति। सः कथयति– **सहजं किल यद् विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।**

**पशुमारणाकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः।।** [3]

अर्थात्– **स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।**[4]

---

१. रघुवंश– ११/९०, २. – २/५३, ३. अभिज्ञानशाकुन्तल –६/१, ४. गीता – ३/३५,

सहजं कर्म कौन्तेयः सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृतः।।गीता – १८/४८ ।।

इत्यादि भगवद्गीता वचनस्मरणात् नैसर्गिको दयासागरोऽपि वैदिको ब्राह्मणः यज्ञाङ्गतया विहिते यज्ञादौ पशुनां हिंसने स्वाभाविके स्वकीये कर्मणि त्यक्तदयःसन् प्रवृतः पशुमारणं दारुणं कर्मं समाचरति। एवमेव ममापि धीवरस्य जालोद्गालादिभिः मत्स्यबन्धनोपायैर्मत्स्यान् व्यापाद्य तद् द्वारा कुटुम्बभरणपोषात्मको जीविकोपायो नोपहासितुं योग्यः।

चतुर्वर्णेषु ब्राह्मण–क्षत्रिययोरुल्लेखो बारम्बारं जातोऽस्ति। यज्ञोपवितधारणं ब्राह्मणानामधिकारे आसीत्। रघुवंशे–

**पित्र्यमंशमुपवीतनक्षणं मातृकं च धनुरूर्जितं दधत्।**

**यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः।।११/६४।।**

क्षत्रियाणां मुख्यकर्मः युद्धं मन्यते स्म। शुद्धक्षेत्रियपुत्राणाम् – आवश्यकाः सर्वे संस्काराः भवन्ति स्म। विक्रमोर्वशीयम् नाटके –

**"यत् क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवताच्यवनेनाशेषमनुष्ठितम्।"**[१]

वैश्यवर्णानाञ्कृते नैगमः,श्रेष्ठी, वणिजः सार्थवाहश्च शब्दाः मिलन्ति ये नितरां स्थल–जलमार्गाभ्यां व्यापारः कुरुतः स्म। विक्रमोर्वशीयनाटके–

**"धारासारोपनयन–परा नैगमाः सानुमन्तः।।"(४/१३)**

शाकुन्तले– **"समुद्रव्यवहारी सार्थवाहोधनमित्रो नाम नौ व्यसने विपन्नः।।"**[२]

**४. मानवजीवने – अवस्थाऽनुसारेण – आश्रमव्यवस्था।**

'आश्रमः' इति कथनेन जीवनस्य– अवस्थायाः चतुर्विभागस्य ज्ञानं भवति स्म। एको द्विजस्य जीवनं चतसृ–अवस्थासु विभाजनं कुर्वन्तिस्म। आश्रमविभाजनविषये रघुवंशे यथा– **शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।**[३]

---

१. विक्रमोर्वशीयम् – ५/२३६, २. अभिज्ञानशाकुन्तलम्–पृ.२१९, ३. रघुवंश–१/८

अर्थात्–बाल्ये ब्रह्मचर्याश्रमिणां, यौवने गृहस्थाश्रमिणां, वार्द्धके: वानप्रस्थाश्रमिणां, शरीरत्यागसमये भिक्ष्वाश्रमिणाम्। एवं प्रकारेण कालिदास समये आश्रमव्यवस्था आसीत्।

कविना त्यागाऽवस्थायाः यत् चित्रणं कृतमस्ति सः हिन्दू समाजस्य अतिप्राचीनरूपेण सम्बन्धितोऽस्ति, तथा अस्य प्रमाणस्याऽधारेण निश्चितं भवति यत् चतसृ–अवस्था यथार्थतः व्यवहारे आसन्। रघुवंशे रघुः स्व पुत्रं स्व स्थाने स्थाप्य स्वयं वानप्रस्थजीवनं यापयति, यतः योग्य–उतराधिकारी वर्तमाने सति सूर्यवंशी कदापी गृहस्थाश्रमे नैव तिष्ठति, एतादृशः त्यागी वल्कलवस्त्रं धृत्वा नगरतः दूरे निवसित स्म। यथा सप्तसर्गस्यान्तिमश्लोक–

**प्रथमपरिगतार्धस्तं रघुः सन्निवृत्तं, विजयिनमभिनन्द्य श्लाध्यजायासमेतम्।**

**तदुपहितकुटुम्बः शांतिमार्गोत्सुकोऽभू, न्नहि सति कुलधूर्ये सूर्यवंश्या गृहाय।।**[1]

अन्यच्च–**गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः।.**

**पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे।।रघु.८/११।।**

**स किलाश्रमन्त्यमाश्रितो निवसन्नावसथे पुराद् बहिः।**

**समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रियाः।।रघु.८/१४।।**

डॉ.कीथ का कथन है–"चार आश्रमों की योजना अनेकों दृष्टि से भारतीय जीवनके बिलकुल उपयुक्त है, क्यौकि यह मनुष्य के जीवनके किसी पक्ष को निरशन मरने नहीं देता।"–ए हिस्ट्री ऑफ संस्कृत लिटरेचर ।[2]

अनेन सपष्टं भवति यत् कालिदास समये सामाजीकजीवनस्य महत्वम् आसीत्। सर्वे न्यायमार्गमनुसरन्ति स्म।

**५.विवाहप्रकाराः।**

कालिदासरचनासु विवाहस्य चत्वारः प्रकाराः मिलन्ति। यथा–

१.स्वयंवरः २.प्राजापत्यः

३.गान्धर्वः ४.आसुरः ५.बहुविवाहप्रथाश्च।

---

१.रघुवंश–७/७१, २.ए हिस्ट्री ऑफ संस्कृत लिटरेचर–पृ.९८

(क) स्वयंवरः।

कन्यायाः अभिभावकः नृपान् स्वयंवरे आमन्त्रयितुं दूतान् प्रेषति स्म। यथा रघुवंशस्य पञ्चमसर्गे इन्दुमती स्वयंवरार्थं विदर्भराजोऽजस्यानयनार्थं दूतं प्रेषति–

**अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः।**

**आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः।।,[१]**

स्वयंवरे नृपाः स्व स्व सेनाभिः साकं कन्यायाः नगरे आगच्छन्ति स्म।

**तं श्लाघ्यसम्बन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम्।**

**प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम्।।[२]**

नगरस्य समीपेऽजस्यागमनं श्रुत्वा विदर्भाधिपतिस्तत्स्वागतार्थं स्व सदनान्निर्गत्य तं प्रत्युज्जगामेत्याह– **तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः।**

**प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली।।रघु.५/६१।।**

राजभवनानि जलकुम्भैः माङ्गलिकवस्तुभिः सुसज्जितानि आसन्। तस्मिन्समारोहे भागं गृह्णन् ईर्ष्याभावपूर्णराजसमूहोऽपि उपस्थित आसीत्, तथा सर्वे कन्यायाः पाणिग्रहणार्थं लोलुपारासन् ।

**तत्र स्वयंवरसभाहृतराजलोकं कन्याललाम कमनीयमजस्य लिप्सोः।**

**भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव।।[३]**

षष्ठसर्गे यदा सरण्या सुनन्दया साकम् इन्दुमती स्वयंवरे वरमालामादाय प्रविवेश तदा सर्वे नृपा सतृष्णैनेत्रैस्तामवलोकयामासुः। यस्य राज्ञः समक्षं सा तस्थौ आशान्वितस्य राजा उद्गतरोमाञ्चोबभूव, किन्तु तस्यामग्रेगतायां स राजा निस्तेजः लज्जितश्च बभूव। तथा च वर्णयामास महाकविः कालिदासः–

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**

**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।[४]**

---

१. रघुवंश–५/३९, २. ५/४०, ३.–५/६४, ४.– ६/६७

सुनन्दा सर्वेषां परिचयं श्रावयामास क्रमशः इन्दुमतीम्। इन्दुमतीश्च सर्वान् राज्ञः अतिक्रम्य यदा अजस्य समक्षमाजगाम तदा सा तत्रैव तथैव तस्थौ यथा समुद्रमवाप्य नदी गति शून्या जायते। सा सुनन्दयोपस्थाप्यमानं परिचयम् श्रुत्वैव अजस्य ग्रीवायां वरमालां स्थापयामास।यथा – **सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः।**

**आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम्।।रघु.६/८३।।**

अन्यच्च– **शशिनमुपगतेयं कौमुदी मेघमुक्तं, जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।**

**इति समगुणयोगप्रीतयस्तत्र पौराः, श्रवणकटु नृपाणामेकवाक्यं विवव्रुः।।**[१]

एवं प्रकारेण नागरिकाणां जयघोषेण सह स्वयंवरक्रिया समाप्ता जाता।

(ख) प्राजापत्यः।

कालिदासः प्राजापत्यविवाहं सर्वोत्तमः कथयति तथा कुमारसम्भवस्य सप्तमे सर्गे स्वप्रधानदेवः शिवस्य विवाहः प्राजापत्यः पद्धत्याऽनुसारेण पार्वत्या सह कारयति, अस्मिन् प्रकारस्य विवाहे कन्यायाः पिता मनुस्मृतौ कथित विवाह पद्धत्याऽनुसारेण आवश्यकः संस्कारानन्तरं स्व कन्यां वस्त्राभूषणैरलङ्कृतं कृत्वा वराय कन्यादानं करोति स्म। यदा कदा कन्यार्थिः कन्यायाः पितापार्श्वे निवेदनं प्रेषति स्म। यथा कुमारसम्भवे अङ्गिरा ऋषिः कन्यार्थिभूत्वा हिमालयसमीपे गच्छति, तत्र अङ्गिरा ऋषेः विवाहसम्बन्धी चर्चां श्रुत्वा पार्वती लज्जया नम्रीमुखी भूत्वा लीला कमलपत्राणि गणयामास। यथा–

**एवं वादिनि देवर्षौ पार्श्वेपितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती।।**[२]

साधारणतः शुक्लपक्षे कस्यापि तिथौ कन्यायाः पिता स्व सम्बन्धिभि साकं कन्यायाः विवाहस्य क्रयादिप्रारम्भिककार्याणि करोति स्म। मार्गमुभतसज्जीकरणं भवति स्म। वधूं–अलङ्करणैः सज्जादिकार्यं सौभाग्यवती स्त्रियः कुर्वन्ति स्म।

**तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य।**

**न चक्षुषो कान्तिविशेषबुद्ध्याकालाञ्जनं मङ्गलमित्युपात्तम्।।(कुमार. ७/२०)**

---

१. रघुवंश–६/८८, २.कुमारसम्भवम्–६/८४,

अन्यच्च – सा सम्भवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा।

सरिद्विहङ्गैरिव लीयमानैरामुच्यमानाभरणा चकासे।।कुमा. ७/२१।।

विवाहसंस्कारानन्तरम्– आह्लाद–आनन्दयोर्वातावरणं भवति स्म। स्त्रियः नाट्याभिनयस्य– आयोजनं कुर्वन्ति स्म। वर्णित विवाहे नव–वर–वधू द्वौ –आनन्दविहारार्थं प्रस्थानम्. अकुरुताम्। यथा–

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति।

भावसाध्वसपरिग्रहादभूत्कामदोहदमनोहरं वपुः।।(कुमा. ८/१)

अर्थात– पाणिग्रहणानन्तरं पार्वत्याः हरं प्रति अनुरागस्वीकारान्मनोहरं शरीरं कामसंवर्धकंसुखमभूत्। नायिकानायकयोरन्योन्यानुभावदर्शनात् सुखमाविर्भवतीति।।

**(ग) गान्धर्वविवाहव्यवस्था।**

अभिज्ञानशाकुन्तलस्याध्ययनेनप्रतीयते यत् तदात्वे गान्धर्वविवाह प्रथा प्रचालिता आसीत्। राजादुष्यन्तोऽपि शकुन्तलया साकं गान्धर्वविवाहं करोति। तद्यथा–

**गान्धर्वेण विवाहेन बह्वयो राजर्षिकन्यकाः।श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः।।**[१]

अर्थात्–दुष्यन्तः वदति प्रिये ! अलमाशङ्कया वयं क्षत्रिया स्म अस्माकं गान्धर्वविवाहः स्मृतिषु श्रेष्ठः स आम्नातः पूर्वमनेका मुनिकुमारिका राजन्यकन्यकाश्च स्वेच्छया स्वानुरूपैर्वरैः सह गान्धर्वेण विवाहविधिना विवाहिताः अनन्तरं ज्ञातवृत्तान्तैस्तदगुरुः मातृ–पितृ भ्रातृभिः तस्य धर्म्यत्वादनुमोदनं कृतमिति पुराणे इतिहासे च तत्कथानकमुपनिबद्धमस्ति। तथैवावयोरपि समर्थनं भविष्यतीति। सकामौ पुरुष–कन्ययोः स्वेच्छया–एकान्ते पारस्परिकमिलनं गान्धर्वविवाहः कथ्यते–यथा–

**सकामायाः सकामेन निर्मन्त्रो रहसिस्मृतः। करस्पर्शस्तु गान्धर्वो विवाहः शुभलक्षणः।।**[२]

कालिदासः निश्चयमनसा गान्धर्वविवाहस्य पक्षपाती नासीत्। अतः दुष्यन्तशकुन्तलयोः गान्धर्वविवाह प्रसङ्गेऽपि स पुराणेतिहासयोरुदाहरणं ददाति। कालिदासः कथयति यत् गान्धर्वविवाहप्रसङ्गे परीक्षणानन्तरं विवाहः कार्यः, कारणञ्च यस्य हृदयगतभावा–अज्ञातानि सन्ति, तं प्रति मित्रभाव शत्रुतायां परिणमति। यथा–

१.अभिज्ञानशाकुन्तलम्– ३/२०, २. अभिज्ञानशाकुन्तलस्य विशेषटीकातः – पृ. १५६,

अतः परीक्ष्य कर्त्तव्यं विशेषात् संगतं रहः।

अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्।।रघु.५/२४।।

अत्र शकुन्तलां सम्बोध्य शार्ङ्गरवो वदति—शकुन्तले ! अवलोकय कीदृग्भूतं चापलस्य फलम्। अनेन कथनेन स्पष्टं भवति यत् मनसा कालिदासस्य गान्धर्वविवाहे समर्थनं नास्ति। दुष्यन्त—शकुन्तलयो—गान्धर्वविवाहः कालिदासाय— एषा प्रिय घटना नास्तीति।

(घ) आसुरविवाहप्रथा।

"दुहितृशुल्कसंस्थया" इति रघुवंशस्य वाक्यांशाधारेण आसुरविवाहानामप्रत्य—उल्लेखो भवति। आसुरविवाहे शुल्क प्रदानमनिवार्यमस्ति।

(ङ) बहुविवाहप्रथा।

अभिज्ञानशाकुन्तलस्याध्ययनेन ज्ञायते यत् तदात्वे सतिसामर्थ्ये बह्वीभिः स्त्रिभिः साकम् विवाहः अनुचितो नासीत् अत एव निःसन्तानं मृतस्य धनवृद्धिनामकस्य श्रेष्ठिनोविषये राजा स्वयमेव वक्ति— **"वेत्रवति महाधनतया बहुपत्नीकेनानेन भवितव्यम्, तदन्विष्यताम् कदाचिदापन्नयत्वास्य भार्या स्यात्।"(अभि. ६/ पृ.३७२)**

**" अनसूयाऽपि तृतीयाऽङ्के राजानं दुष्यन्तं वक्ति— "बहुवल्लभाः खलु राजानः श्रूयन्ते।"(अभि. ३/पृ. १५१)**

अभिज्ञानशाकुन्तलस्याध्ययनेनैव ज्ञायते यत् राज्ञो दुष्यन्तस्य तिस्रपत्नयः शकुन्तला, सानुमती, वसुमती च आसन्। विदूषकस्य कथनानुसारेण अन्तः पुरस्थाः राज्ञीं विहाय शकुन्तलांप्रति दुष्यन्तस्याकर्षणं पिण्डीखजूरं भक्षणेनोद्विग्नस्य पुरुषस्य तित्रिणीम्प्रति लौल्यमिवास्ति। सामान्तानां— धनपतिनाञ्च बहुधा अनेक पत्नयः भवन्ति स्म। रघुवंशे—

**कलत्रवन्तमात्मानमवरोधे महत्यपि।**

**तया मेने मनस्विन्या लक्ष्म्या च वसुधाऽधिपः।।रघु.१/३२।।**

कालिदासस्य नाटकेषु वर्णितनृपाः निरपवादरूपेण बहुपत्नीकाः आसन्। मालविकाग्निमित्रे वर्णितप्रसङ्गेन स्पष्ट भवति यत् सपत्न्यापि शान्तिपूर्वकं प्रेम्णा सह निवसन्ति स्म। यथा–

**सर्वान्तःपुरवनिता व्यापारप्रति निवृत्तहृदयस्य।**

**सा वामलोचना मे स्नेहस्यैकायनीयभूता।।[1]**

**प्रतिपक्षेणापि पतिं सेवन्ते भतृवत्सलाः साध्व्यः।**

**अन्यसरितामपि जलं समुद्रगाः प्रापयन्त्युदधिम्।।(माल.५/१९)**

निस्सन्ताने पुरुषे मृते सति तस्य सम्पूर्णा सम्पत्ति राजकीया भवति स्म।

अभिज्ञानशाकुन्तलस्य षष्ठाङ्के प्रतिपादितमस्ति यत् शकुन्तलाविरहव्याकुलो राजादुष्यन्तः राज्यस्य कार्यभारममात्ये निवेश्य एकदा धर्मासनं नह्यध्यास्ते स्म। तदा अमात्यः निस्सन्तानंमृतस्य धनवृद्धिनामकस्य श्रेष्ठिनः सम्पूर्णां सम्पत्तिं राजकीयांघोषयित्वा, तस्य कार्यस्य सूचनां राज्ञः सविधे प्रेषयामास।

❖ **कालिदासकालिको विवाहसम्बन्धी केचन विवेचनानि।**

कालिदासकालेविवाहः सामाजिकः तथा धार्मिककर्तव्यसम्पादनार्थं भवति स्म। यथा–

**"तदिदानीमापन्नसत्वा प्रतिगृह्यतां सहधर्मचरणायेति।"[2]**

**"गान्धर्वेण विधिना निवृतकल्याणा शकुन्तलानुरूप भर्तृगामिनी संवृत्तेति निर्वृत्तं मे हृदयम्।"(अभि. ४/१६४)**

कुमारसम्भवे–

**तत्रकाञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम्।**

**दक्षिणेतरभुजव्यापाश्रयां व्याजहार सहधर्मचारिणीम्।।[3]**

**किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः।।८/५१।।**

---

१. मालविकाग्निमित्रम्– २/१४, २.अभिज्ञानशाकुन्तलम्– ५/पृ.२४५, ३.कुमारसम्भवम्–९/२९,

उपर्युक्ताः वाक्यांशाऽऽधारेण पुरोहितः वर–वधूं आदेशति स्म, अस्य फलस्वरूपेणैव 'पत्नीम्' धर्मपत्नीसंज्ञा दीयते स्म। अपरञ्च– अभिज्ञानशाकुन्तले–

**संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।**

**कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोत्पबीजा।।६/२४।।**

ये धार्मिकाः आसन् ते धार्मिकाऽनुष्ठानसम्पादने रता आसन्। तेषां धार्मिककर्मकाण्डार्थं पत्नी परमाऽवश्यकी भवति स्म। "वैवाहिकबन्धनम्" प्रणयगत स्नेहस्य 'फलम्' मन्यते स्म। यथा–

**रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम्।**

**विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत।।**[१]

अतो विवाहः निःसत्व कर्तव्यान् वहन् स्नेहयुक्त आसीत्। स्नेहः पति– पत्न्यौ– एकाकारः करोति। अतो वरं 'अर्हतं' तथा वधूं 'सत्क्रिया' नाम्ना उपाधिः दत्तमस्ति। शाकुन्तले–

**त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः शकुन्तला मूर्तिमती च सत्क्रिया।**

**समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः।।५/१५।।**

इह जन्म तथा अपर जन्मार्थं द्वयो हृदययोः– एकाकारभवनम्, अयं प्रकृति–पुरुषयोः संयोग आसीत्। यथा रघुवंशे–

**ता नराधिपसुता नृपात्मजैस्ते च तामिरगमन्कृतार्थताम्।**

**सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः।।११/५१।।**

यथार्थरूपे कालिदासकाले अतः पूर्वकालेण्वपि विवाहस्य महत्वं न्यूनं – नासीत्। शाकुन्तले–

**"किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मनः।"**[२]

प्रो.ए.बी.कीथ महोदयस्य कथनमस्ति–"कुमारसम्भव में वर्णित शिव और पार्वती

---

१. रघुवंश–३/२४, २. अभिज्ञानशाकुन्तलम्–७/पृ.३८२,

का विवाह कोई साहसिक कार्य, साधारण खेल या जेयुस और डेनीज्या अन्य किसीके हलके–फुलके प्रणय की प्रेमकहानी नहीं है। उनका विवाह कोई यार, मानव विवाह और प्रणय के आदर्शरूप और देवी चरित्रों द्वारा उन शक्तियों को स्वीकार करते हैं, जिन के हाथों पर बसता और मानवजाति उन्नतिपथ पर अग्रगामिनी होती है।"[१]

SMT. HANSA MEHTA LIBRARY
MAHARAJA SAYAJIRAO UNIVERSITY

शिवः केवलं पार्वत्याः अलौकिकाऽनुरागस्याग्रे पराजयः स्वीकरोति। क्षीणकायाः उमायाः शरीरे तपश्चर्यार्थं शक्तिः स्वयमागच्छति। रघुवंशे कालिदासेन सर्वत्र राज्ञां केवलं प्रीतिविवाह एव न वर्णितः। रघुदिलीपादीनां राज्ञामद्यतनो ब्राह्मणविधि निष्पन्नो विवाहसंस्कारस्तेन वर्णितोऽस्ति। रामकुशादयः केचिद्राजानः स्वपराक्रमहेतुना विशिष्टाः स्त्रियः समासादितवन्तः इति कविना यत् प्रतिपादितं तस्मिन्नपि प्रेमसम्बन्धो न समायति। एतादृशाश्च सम्बन्धा दुःखव्यवसायिनः संजाता इति संकेतः कुत्रापि नहि मिलति। अतः प्रीति विवाहः कौटुम्बिकसुखार्थमत्यावश्यकोऽस्तीति न कालिदासमतं प्रतिभाति। परं च प्रीतिविवाहम्प्रति कवेरौदासीन्यमासीदित्यापि न सिद्ध्यति, अन्यथा निजेषु सर्वेषु नाटकेषु स तस्य प्रीतिविहस्य रमणीयचित्रं नारंजयिष्यत्। उर्वशीशकुन्तलयोरुपरि विवाहानन्तरं महती विपत्तिरापतिता इति सत्यम किन्त्वेतस्य कारणं न तयोः प्रणयविवाह आसीद् अपितु भवितव्यतैवासीत् । परं तथापीदं मन्तव्यं यत् केवलं बाह्यसौन्दर्याधारितं प्रेम च स्थायि भवति, अतः प्रेमाकृष्टानां जनानां कृते विवाहत्पूर्वं स्वपित्रोः सम्मतिरवश्यमेव ग्राह्या भवति, ताभ्यामपि सम्यग् विचिन्त्य स्वपुत्रीपुत्रेभ्य सुखावहा सम्मतिर्दातव्याऽस्ति। इदमेव स्वमतं कविना रघुवंशे प्रकटितम् । रघुवंशे–

**"श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकांक्ष।।"(५/३८)**

अत्र लक्ष्मीरतिगम्भीरस्वभावसम्पन्नकन्यारूपेण वर्णिताऽस्ति। कालिदासस्य सर्वासु नायिकासु श्रेष्ठाऽस्ति पार्वती या स्वोग्रतपसा एकनिष्ठ्यप्रेमद्वारा च श्रीशंकरं वशे कृत्वाऽपि गान्धर्वविवाहभावनां परित्यज्य स्वसखीमुखेन पितुः सम्मतिं ययाच , इत्यनेनापि कथितम्– अनुमानं प्रतीयत इति सिद्धम्।

## ६. कालिदाससमये शासनव्यवस्था।

कालिदाससमये राज्ञां सुशासनप्रभावात् सर्वथा सुखशान्तिर्व्याप्तासीत् , तदा राजानः केनप्रकारेण राज्यं कुवन्ति स्म इति निर्देशन् कविः कथयति यत् ते जनकल्याणराज्यं

---

१.कालिदास का भारत–१, पृ. २६३

संचालयन्ति स्म। कोऽपि राजा तदा प्रजानांहितकरणाद् रक्षणभरणाच्च तासां पितेव तत्समाजे मन्यते स्म । यः शासकः प्रजाभ्यो दुःखदानपूर्वकं करं नैव गृह्णाति स्म, किञ्च सर्वमपि गृहीतंकरं प्रजानां कल्याणार्थमेव रक्षति स्म । रघुवंशे –

**प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।**

**स पिता नितरस्तासां केवलं जन्महेतवः ।।१/२४ ।।**

**प्रजानामेवभूत्यर्थं स ताभ्यो बलिमग्रहीत् ।**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।१/१८ ।।**

राजानं वर्णयन्कविः पुनः कथयति यद्राजा शिष्टं सदाचारवन्तं च नरं विरोधिनमपि सम्मानयति स्म, तथा प्रियोऽपि जनो यदि दुष्ट आसीत्तदा तं त्यजति स्म। यथा–

**द्वेष्योऽपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधम्।**

**त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।।.[१]**

तदानीन्तना राजनस्तावद् राज्यशासनं संचालयन्ति स्म यावत्तेषां पुत्रा वयस्का न भवन्ति स्म। वस्तुतो राजा रघुः स्वपितरं दिलीपं प्रार्थितवान् स एव राज्य सिंहासनासीनस्तिष्ठतु तदा दिलीपस्तं युवराजरूपेण नियुक्तवान् स्वयं च वनं गतवान्। तद्यथा–

**अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे, नृपतिककुदं दत्त्वा यूने सितातपवारणम्।**

**मुनिवनतरुच्छायां देव्या तया सह शिश्रिये,गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ।।[२]**

अतः सुस्पष्टं सिद्धयति यत् कालीदासीय समाजे सिंहासन प्राप्तये राज्ञां हननं विरोधो वा कदापि न क्रियते स्म।

## ७. कालिदाससमाजे पुत्रस्यमहत्वम्।

कालिदासस्यग्रन्थेषु पुत्रविषये विस्तारेण वर्णनं प्राप्यते। रघुवंशस्य प्रथमसर्गे(६५–७१) पर्यन्तं सप्तश्लोकेषु पुत्रस्य महत्व विषये वर्णनमस्ति। तधथा–

१. रघुवंश–१/२८, २.रघुवंश– ३/७०.

नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।

न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः।।[१]

अर्थात्– अत्र दिलीपः गुरुः वशिष्ठं स्ववेदनां श्रावयान् कथयति यत् पुत्ररहितं भामवलोक्यातः परं न पिण्डप्राप्तिसम्भवः इति विचारयन्तो मत्पितरः सम्यग् प्रकारेण तृप्तिक्षमं श्राद्धं पिण्डं भोक्तुं नोन्सहन्ते। अनयच्च–

मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।

पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते।।रघु.१/६७।।

सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।

प्रकाशश्चाप्रकाशश्च लोकालोका इवाचलः।।रघु.१/६८।।

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।

सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।।रघु. १/६९।।

'विक्रमोर्वशीयम्' नाटकेऽपि सन्तानस्य महत्त्वं दृश्यते। इन्द्रः उर्वशीं कथयति –

"तत् तावत्त्वं पुरूरवसं यथाकाममुपतिष्ठस्व यावत्स परिदृष्टसन्तानो भवति।"[२]

तदानीन्तकाले पुत्रोत्पत्यानन्तरं उत्सवस्यायोजनं कुर्वन्ति स्म। विक्रमोर्वशीयम् नाटके – राजा – उर्वशीं कथयति– किं सुन्दरि प्ररुदितासि ममोपनीते

वंशस्थितेरधिगमान्महति प्रमोदे।[३]

शाकुन्तले–

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।

स्फुलिङ्गावस्थया वह्रिरेधापेक्ष इव स्थितः।।[४]

---

१. रघुवंश–१/६६, २. विक्रमोर्वशीयम्–३/पृ.१०२., ३.–५/१५, ४. अभिज्ञानशाकुन्तलम्–७/१५

अर्थात्– अत्र राजा तेजस्वी बालकं दृष्ट्वा – वदति – अणुरप्यग्नेः स्फुलिङ्गः काष्ठसंयोगाद् यथा प्रबुद्धो महते तेजसे सम्पद्यते, तथैवायं बालः अनल्पस्य महापुरुषतेजसो बीजमिव समयापेक्षो वर्धिष्णुर्विभाव्यते।

श्री रामस्य जन्मसमये दशरथादपि देवा अधिकं प्रहृष्टा। यथा–

**पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः।**

**आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि।।रघु.१०/७६।।**

उपर्युक्तोदाहरणे स्पष्टं भवति यत् कालिदाससमयेऽपि पुत्रस्य महत्वं न्यूनं नासीदिति।

## ८. कालिदाससमये भोजनखाद्यान्नप्रकाराः ।

कालिदासः स्वग्रन्थेषु निम्नलिखितखाद्यापदार्थानामुल्लेखः करोति।

**(१) यवः– "अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः।"( रघु. ९/४३)**

**(२) शालिः**– ऋतुसंहारे शालिधानस्य वर्णनम् – प्राप्यते। यथा–

**–आपक्वशालिरुचिरा नतगात्रयष्टिः**

**प्राप्ताशरन्नववधूरिव रूपरम्या।**[१]

**– आकम्पयन्फलभरानतशालिजालान्।।३/१०।।**

**– संपन्नशालिनिचयावृतभूतलानि।।३/१६।।**

**– नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः।।४/१।।**

( सस्य कथनेन गोधूमादिभिः धान्यानां ज्ञानं भवति।)

रघुवंशे शालिधान्यवर्णनम् – **तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः।।१५/७८।।**

**– गर्भशालिसधर्माणिस्तस्य गूढ विपेचिरे।।**[२]

(३) कलमा – अनेक जातीनां धान्यविशेषः वर्तते । अमरकोशे– शालयः कलमाद्यास्य षष्टिकाद्याश्च पुंस्यमी।।

---

१. ऋतुसंहारम्–३/१. २.रघुवंश–१३/५३

आपादपद्मप्रणताः कलमा इव ते रघुम्।। रघु. ४/३७।।

कपोलदेशे कलमाग्रपिङ्गला।।[१]

एवं प्रकारेण तिल – मत्स्यण्डिका – दूग्ध – दधी – घृत – नवनीत – शर्करा – एला लवंगादीनामुल्लेखो प्राप्यते। कालिदाससमये भारतीयभोजनं पुष्टिकरं शक्तिदायकञ्च भवति स्म। यवः गोधूमः शालिधान्यमादि लोकानां मुख्यभोजनानि आसन्। घोषवृद्धाः नृपाय–उपहारार्थं नवनीतं ददति स्म। रघुवंशे–

**हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।**

**नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।**[२]

खाद्यपदार्थेषु मत्स्य, मांसस्याऽपिप्रयोगं भवति स्म। अभिज्ञानशाकुन्तले द्वितीयाऽङ्के विदुषकः वदति। यथा–" **अनियतवेलं च उष्णोष्णमांसभूयिष्ठं भुज्यते।" ( अभि. २/पृ.७७)** भोजनस्य पाके– उपस्कराणामपि प्रयोगो भवति स्म। भोजनस्य पञ्चप्रकाराणामुल्लेखः कविः 'विक्रमोर्वशीयम्' नाटके करोति। यथा– **"तत्र पञ्चविधस्याभ्यवहारस्य– उपनतसम्भारस्ययोजनां प्रेक्षमाणाभ्यां शक्यमुत्कण्ठां विनोदयितुम्।(वि .२/४८)** अभ्यवहारस्य – इति कथनेन भक्ष्य – भोज्य – लेह्य– चोष्य– पानीयभेदेन , पञ्चविधत्वं सिध्यति।

## ९. कालिदासकाले श्रृङ्गारोपकरणानि।

श्रृङ्गारस्योपकरणेषु पुष्पाणां मुख्यस्थानमासीत्। जनसाधारणानां सौन्दर्यरचनायामपि पुष्पाणामधिकतया – उपयोगं भवति स्म। पुष्पं विना कोप्युत्सवः शक्योनासीत्। समाजस्य प्रत्येकशुभावसरे सज्जा–सामग्रिषु पुष्पं मुख्यस्थानं प्राप्नोति स्म। नर–नार्यराभूषणार्थे पुष्पमालादयः दधति स्म। मेघदूते –

**गत्युतकम्पादलकपतितैर्यत्र मन्दारपुष्पैः पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च।**

**मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्।।**[३]

कुमारसम्भवे– **वसन्तपुष्पाभरणं वहन्ती।**

**– पर्याप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव।**

---

१.कुमारसम्भवम्–५/४७, २.रघुवंश–१/४५, ३. मेघदूतम्–२/११

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम्।।( ३/५३,५४,५५)

प्रसङ्गानुसारं कालिदासेन विविधकौटुम्बिकानां सामाजिकानां च सद्गुणानामुल्लेखः कृतः, तेन मातृ–पितृप्रेम पति–पत्नी–बन्धुप्रेम–अपत्यप्रेमादीनां मनोहरं चित्रं निजग्रन्थेषु तत्राङ्कितमस्ति। एतदतिरिक्तं युक्ततामयुक्ततामविचार्य गुरुजनाज्ञा पालनीया इत्यपि कालिदासेनोपदिष्टम्। " **आज्ञां गुरुणां ह्यविचारणीया।" इति**। पूज्यजनानां समादरेणावश्यमेव कल्याणं भवतीति निर्दिशन्कालिदासः कथयति– "**प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।"इति**। अतिथिसत्कारः सर्वदावश्यं कर्तव्यः, इति स्वग्रन्थेषु कालिदासेनोपष्टिमस्ति। तदात्वे अतिथिः देवतातुल्य मन्यते स्म, तस्यश्रद्धया पूजाऽपि भवति स्म। रघुवंशे–

**तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः।**

**अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे।।**[१]

अर्थात्– वसिष्ठाज्ञया मुनयो नीतिमते रक्षकाय सपत्नीकाय राज्ञे दिलीपाय पूजां विदधुः। कुमारसम्भवे अतिथिसत्कारः –

**तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती।**

**भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः।।**[२]

**निष्कर्षः–**

एवमुपर्युक्तपर्यालोचनेन निष्कर्षतः स्पष्टमिदं प्रतीयते यत् कालिदासकालिना सामाजिकपरिस्थितिः सम्यग् न्यायसंगता, कल्याणप्रदा, शान्ता , समृद्धिपूर्णा सर्वथा सुखावहा चासीदिति।

---

१.रघुवंश–१/५५, २. कुमारसम्भवम्–५/३१

## ३.कालिदासकृतीनां धार्मिकदृष्ट्या वैशिष्ट्यम् ।

कालिदासस्य कृतीनां धार्मिकदृष्ट्या चिन्तनावसरे प्रथमं तावत् धार्मिकः शब्दस्य व्युत्पत्तिः शब्दार्थज्ञानमावश्यकम्। श्री वरदराजाचार्य लघुसिद्धान्तकौमुद्यां तद्धितप्रकाणान्तर्गत ठगधिकारे धार्मिकः शब्दस्य सिद्धिरनेन प्रकारेण करोति। –

"धर्मं चरति' इति विग्रहे द्वितीयान्तसमर्थाद् धर्मशब्दात् 'चरति' अनुतिष्ठति इत्यर्थे "धर्मं चरति" इति सूत्रेण ठक्–इक् आद्यचोवृद्धादि कार्यं कृत्वा धार्मिकः शब्दस्य सिद्धि र्भवति।" (तद्धिते ठगधिकारः पृ.२७२)

धार्मिकः शब्दस्यानेका अर्था सन्ति। यथा–"पुण्यात्मा, न्यायशीलः, सद्गुणसम्पन्नः, सत्याश्रितः, न्यायः, न्यायोचितश्च।–(संस्कृत –हिन्दी–कोशः–श्री वामन आप्टे पृ.४९६) इमे शब्दाः साहित्यग्रन्थे सारगर्भत्वमावहन्ति। ईशावास्योपनिषदि भक्तः सत्यस्वरूपपरमात्मनः दर्शनार्थं किदृक् प्रार्थयति । यथा –

" हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।।"[१]

अर्थात्– भक्तः कथयति तव भक्तिरूपः सत्यधर्मस्यानुष्ठानार्थशीलं मां तव स्वरूपदृष्टये तत् आवरणम् – अपावृणु। अत्र धर्मचरति सः धार्मिको भवति, यो धार्मिको भवति सः कर्तव्यनिष्ठो भक्तः स्वलक्ष्यं प्राप्नोतीति। एतादृश उपनिषदवैदिकपरंपरां महाकविकालिदासेनाऽपि स्वकृतिषु , अनेकधाऽनेकस्थाने सर्वेषां पाठकवर्गाणां कल्याणार्थमात्मकल्याणार्थं वा ईश्वरप्रार्थना कृतमस्ति । साहित्यदर्पणे काव्यफलवर्णनप्रसङ्गे कविराजविश्वनाथेनोक्तम् –

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**

**काव्यादेव यतस्तेन तत्स्वरूपंनिगद्यते।।**[२]

चतुर्वर्गकथनेन धर्मार्थकाममोक्षज्ञानं भवति , अत्र चतुर्वर्गे प्रथमः धर्मः समागच्छति, यदि मोक्षस्य इच्छास्ति तथाऽपि धर्माचरणं प्रथमावश्यकम्। अतः कालिदासेन सुकुमारबुद्धीनां परिपक्वबुद्धीनाञ्च सर्वेषां काव्यपरिशीलनपराणां जनानां परमानन्दसन्दोहजनकतया

---

१. ईशावास्योपनिषद–पृ. १५, २. साहित्यदर्पण–१/पृ. २

अनायासादेव स्वेष्टकामपूर्तिः स्याद् तदर्थ स्व खण्डकाव्ये, महाकाव्ये, नाटकेचाऽपि धर्मस्य चर्चा सुन्दरतया कृतमस्ति। धर्मविषये कालिदासोऽतीवोदारः प्रतियते। तस्य धार्मिकभावनायां क्वचित् संकीर्णता न दृश्यते। यद्यपि सः प्रधानतः शिवोपासको मन्यते, तथापि भारतीयदर्शनशास्त्रं तथाऽन्य धर्मं प्रति तस्य कृतिषु, उच्चभावना दरीदृश्यते। यः तादृशः महाकवेः कृते पूर्णतः स्वाभाविकोऽस्ति। परमात्मानं कालिदासः वाङ्मनसगोचरं स्वीकरोति। रघुवंशे यथा–

**प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।**

**अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम्।। रघु. १०/१५।।**

यो विष्णुः जगतः रचयिता पालनकर्ता संहारकर्ताप्यस्ति। तद्यथा–

**नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।**

**अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने।।रघु.१०/१६।।**

त्रिभिर्गुणैर्युक्तो भूत्वा सो वै विष्णुः नाना रूपं धरति। तद्यथा–

**रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।**

**देशेदेशे गुणेष्वेवमवस्थास्त्वमविक्रियः।।रघु.१०/१७।।**

सैव ईश्वरः परिच्छिन्नलोकः निष्पृहः, कामदः जयशीलः, अतिसूक्ष्मरूपोऽपि स्थूल रूपस्य कारणमस्ति। यथा–

**अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।**

**अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्।।रघु.१०/१८।।**

अन्यच्च–

**केवलं स्मरणेनैव पुनासि पुरुषं यतः।**

**अनेन वृत्तयः शेषा निवेदितफलास्त्वयि।।[१]**

अभिज्ञानशाकुन्तलस्य प्रथमोऽङ्के यदा राजा रथेन मृगमनुसरन्नस्ति। तदैव आश्रम

१. रघुवंश–१०/१९

समीपे, वने समिदाहरणाय गच्छन् ऋषिपुत्रै: सह तस्य मेलनं भवति, तदा वैखानस राजानं कथयति–

**"एषः खलु कण्वस्य कुलपतेरनुमालिनी तीर माश्रमो दृश्यते। न चेद् अन्य कार्यातिपातः प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः।"अभि.१/पृ.२२**

उपयुक्तं कथनेनानुमीयते यत् तैत्तिरीयोपनिषद एकादश अनुवाके–।।**अतिथि देवो भव।।** (ईशादिनौ उपनिषद्–पृ.३००)

वाक्यस्य प्रयोगोऽस्ति, तमुपनिषद वाक्यमनुसृत्य महाकविना वेदविहितधर्माचरणस्य मूलम् अतिथि सत्कारः। "सर्वदावश्यं कर्तव्य इत्यस्मान् संकेतोऽत्रकृतमस्ति।।

तदैव वार्तालापाऽवसरे राजा वैखानसं पृच्छति **"अपि सनिहितोऽत्रकुलपतिः? तदा वैखानसोत्तरत्ति" इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थंगतः।अभि.–१/पृ.२४**

अत्र प्रतिकुलं कथनेन शकुन्तलायाः विवाहादि प्रतिबन्धकमशुभं नवग्रहादिजनिताऽदृष्टदोषेलक्ष्योऽस्ति। तं दोषं शान्त्यादि पूजनेन शमयितुं सोमतीर्थंगमनचर्चायाः उल्लेखेनाऽनुमीयते यत् कविः पूजादि कर्मकाण्डेऽपि विश्वासमाधत्ते। महाकविः कालिदासः शिवोपासकोऽस्ति– अभिज्ञानशाकुन्तलस्य मङ्गलाचरणे स्वग्रन्थस्य निर्विघ्नपरिसमाप्तये स्वेष्टदेवता– अष्टमूर्तिधरं–शिवं स्तौतिः–

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्रि,**

**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः,**

**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।**[१]

रघुवंशस्य मङ्गलाचरणेऽपि– साम्ब सदाशिवं स्तौति–

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**[२]

---

१. अभिज्ञानशाकुन्तलम्–१/१, २.रघुवंश–१/१

"विक्रमोर्वशीयम्" नाटके– स्थाणुः शिवं स्तौति– यथा–

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी,

यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते,

सस्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ।।विक्रम.१/१।।

मालविकाग्निमित्रंनाटके –

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः,

कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्।

अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः,

सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः।।माल.१/१।।

कुमारसम्भवस्य द्वितीयसर्गे चतुर्थश्लोकतः पञ्चदशश्लोकपर्यन्तं सर्वे देवाः ब्रह्माणं स्तुवन्ति–

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।

गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे।।

यदमोघमपामन्तरुप्तं बीजमज! त्वया।

अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे।।

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।

प्रलयस्थितिसर्गाणामेकः कारणतां गतः।।

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।

प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ।।

स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य च।

यौ तु स्वप्नाऽवबोधौ तौ भूतानां प्रलयोदयौ।।

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।

जगदादिरनादिस्त्वं जगदीशो निरीश्वरः।।

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।

आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे।।[१]

नदीनां सङ्गमे स्नानं तथा युद्धे वीरगतिर्प्राप्तिश्च द्वावैव पुण्यकर्मौ स्तः। रघुवंशे—

कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतप्रियाऽपि।

वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श।।७/५१।।

श्री अरविन्देन कालिदासस्य ग्रन्थेषु भारतीय संस्कृतिपरक धार्मिकसारतत्वं दृष्ट्वा कथितमासीत्। "वाल्मीकि, व्यास और कालिदास भारतीय इतिहास की अन्तरात्मा के प्रतिनिधि हैं। सबकुछ नष्ट होजाने के बाद भी इनकि कृतियों में भारतीय संस्कृति के प्राणतत्त्व सुरक्षित रहेंगे।" [२]

रघुवंशे एकः प्रसङ्गोऽस्ति अजः गङ्गा—सरयू द्वयो सङ्गमतीर्थौ स्नात्वा शरीरं त्यजति, तथा स्वर्गे गत्वा इन्दुमतीं प्राप्य तया सह नन्दनवनस्य क्रीडाभवने क्रीडति। यथा—

**तीर्थे तोयव्यतिकरभवे जह्नु कन्यासरय्वो—**

**देहत्यागादमरगणनालेख्यमासाद्य सद्यः।**

**पूर्वाकाराधिकतररूचा सङ्गतः कान्तयाऽसौ**

**लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु।।**

अनेन श्लोकेन धार्मिकदृष्ट्या जलस्य महत्त्वं प्रकटं भवति। कालिदासः धर्मार्थकाममोक्षेषु विश्वसिति—

---

१.कुमारसम्भवम्—२/ ४ तः १०, २.कल्याण चरित्रनिर्माणांकः सन् १९८३ तः उद्धृतः।

च चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः।

धर्मार्थकाममोक्षाणामवतार इवाङ्गवान्।।[1]

कालिदासस्य कर्मसिद्धान्तो यया रघुवंशे–

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।

गुणा गुणानुबन्धित्वात्तस्य स प्रसवा इवं ।।[2]

अन्यच्च– इतरो दहने स्वकर्मणा ववृते ज्ञानमयेन वह्निना।। ८/२०।।

जीवनेस्यऽनिश्चितता विषये यक्षःस्व वल्लभायै प्रेषितसन्देशे सङ्केतो ध्वन्यते। यथा मेघदूते –

अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तः,

पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव।।[3]

अर्थात्–हे अबले भवत्याः सहचारी चित्रकूटाश्रमस्थः विशिष्टामापदप्राप्तः न मृतः वियोगं प्राप्तः सन् भवतीं मङ्गलं जीवनधारणरूपं पृच्छति, यतः अयत्नसिद्धविपत्तीनां जीवानां कुशलमेव प्रथमं भाषणीयम्। कालिदासं जीवने भाग्योपरि श्रद्धा वर्तते।'शाकुन्तलम्' नाटके कुमारोभरतः यदा दुष्यन्तविषये पृच्छति तदा शकुन्तला वदति –" वत्स! ते भागधेयानि पृच्छ।"( अभि. ७/ पृ.४०२) अर्थात्– अथेदृशं ते भाग्यं यदिहैव वने वसन् तपाश्चरिण्यसि तदा धराधिपोऽयं दुष्यन्त इत्येवासस्य पर्याप्तः परिचयः। अथवा येषां फलमस्यदर्शनं लाभः तानि भाग्यानि पृच्छ। रघुवंशे कवेः टिप्पण्यस्ति–

" विषमप्यमृतं क्वचिद् भवेदमृतं वा विशमीश्वरेच्छया।।"( रघु.)

जीवनं सुखदुःखयोः श्रृङ्खलाऽस्ति क्रमशः प्रचलति उभौ समानरूपेण सत्यौ स्तः। कारणञ्च नैरन्तर्येण सुखं दुःखं वा केनाऽनुभूतम्? जनानामवस्था चक्रधारा वदध उपरिच प्रवर्तते। यक्षः मेघं वदति त्वं मम प्रियां प्रबोधयतु। यथा–

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।

नीचैर्गच्छत्युपरि च दशा चक्रनेमि क्रमेण।।[4]

---

१.रघुवंश–८/९५, २. १०/८४, ३.मेघदूतम्–२/३८, ४. मेघदूतम्–२/४६,

जन्मान्तरेऽपि कालिदासो विश्वासं धरति। अतः कर्मसिद्धान्ते तस्य श्रद्धा वर्तते। स कथयति –

**परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ।।रघु. ८/८५।।**

अन्यच्च –

**गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसङ्गतिज्ञम्।। रघु. ७/१५।।**

कविः कालिदासानुसारेण मनः पूर्वजन्मस्य स्व सम्बन्धं सम्यकतया जानाति–" **मनो हि जन्मान्तरसंज्ञतिज्ञम्।**" अस्मिन् पंक्तौ टिप्पणीकुर्वन् मल्लिनाथःस्वभावं प्रस्तौति – तदेवेदमिति प्रत्यभिज्ञाभावेऽपि वासनाशेषवशादनुभूतार्थेषु मनः प्रवृतिरस्तीत्युक्तम्। जन्मान्तरसाहचर्यमेवात्र प्रवर्तकमिति भावः। यद्यप्यस्मान् पूर्वाजन्मानां स्मृतिर्नैव व्यसनेषु रमति। जन्मान्तराणामस्माकं साहचर्यः अथवा सम्बन्धकारणात् अस्मिन् जन्मनि तत्र सम्बन्धेषु प्रेरयति।

अर्थकामयोः तुलनायां कालिदासः धर्मं प्रशंसति। कुमारसम्भवे–

**अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि।**

**त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेवते।।**[१]

अर्थात्–प्रशस्ताभिप्राये अनेन कारणेन धर्मः सातिशयमद्य मे धर्मकामार्थानां सारः प्रतिभाति अस्मात्कारणात् त्वयैको धर्म एव स्वीकृत्य सेव्यते। यत्त्वयार्थकामौ विहाय धर्म एवावलम्बितः, अतः सर्वेषां नः स श्रेयानिति प्रतिपद्यत।

गीतायामाध्यात्मिक जीवनस्य परिपोषणं यज्ञदान– तप– साधनैर्भवतीति कथितं वर्तते–

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।**

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।**

**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।**

**कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।**[२]

कालिदासोऽपि यज्ञदान– तपादीनां महिमा स्वकृतिषु निरूपयन् कथयति।

---

१.कुमारसम्भवम्– ५/३८ २. गीता –१८/५,६,

रघुवंशे–यज्ञमहिमा– हविरार्जितं होतस्त्वया विधिवदग्निषु।

वृष्टिर्भवति सस्यानामवग्रह विशोषिणाम्।।१/६२।।

अर्थात्– हे होतः! त्वमाज्यादिकं यदग्नौ मत्कल्याणार्थ जुहोषि, तदेव वृष्टिर्भूत्वा सस्यानमुपजीवकं भवति। अतोऽस्मद्राज्ये कुतो दैवीनाम्, मानुषीणाञ्चापदां सम्भवः स्यात्। अन्यच्च–

**इति क्षितिशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः।**

**समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव।।रघु. ३/६९।।**

अर्थात्– नृपतिर्दिलीपो जीवनान्ते स्वर्गमारोढुमिच्छु सन् सोपानपंक्तितुल्यानश्वमेधयज्ञान् नवाधिकनवतिसंख्यकान् यथाविधिः सम्पादितवान्। दान महिमा–

**स विश्वजितमाजह्रे यज्ञ सर्वस्वदक्षिणम्।**

**आदानं हि विसर्गाय सतां वारिमुचामिव।।[1]**

तपसः महिमा कालिदासस्य ग्रन्थेषु उपलभ्यते। 'अभिज्ञानशाकुन्तलस्य' प्रथमोऽङ्के राजा वदति–

**"सूत! नोदयाश्वान्। पुण्याश्रमदर्शनेनतावदात्मानं पुनीमहे।"(अभि. १/ पृ.२५)**

अन्यच्च–

**शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।**

**स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद् वमन्ति।।[2]**

अर्थात्– स्पर्शेसति शीतला – अपि प्रतीयतामानाः सूर्यकान्तमणयो यथा सूर्यतेजसा अन्तः स्थितमग्नि बहिरुद्गिरन्ति तथा स्वभावतः शमप्रधान ऋषयः परकृत विघ्नेन संक्षिप्त हृदया स्वान्तः स्थितपरनिग्रहसामर्थ्य सद्यः प्रकटय्य निगृह्णति परानिति। अस्मिन् श्लोके तपोपूताः तपस्वीनां महिमायाः

१. रघुवंश –४/८६, २. अभिज्ञानशाकुन्तल –१/७

वर्णनं वर्तते।तप महिमा कुमारसम्भवे–

**अद्यप्रभृत्यवनताङ्गि ! तवास्मि दासः, क्रीतस्तपोभिरिति वादिनि चन्द्रमौलो।**

**अह्नाय सा नियमजं क्लममुत्ससर्ज, क्लेशः फलेन हि पुनर्नवता विधत्ते।।[१]**

व्यक्तिगतजीवने महाकविरात्मसंयममहत्वं ददन् ब्रह्ममुहूर्तेजागरणस्यावश्यकतां स्वीकरोति। रघुवंशे–

**अतिथिं नाम काकुत्स्थात्पुत्रं प्राप कुमुद्वती।**

**पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना।।[२]**

अर्थात्– ब्राह्मे सर्वेषां बुद्धिवैशद्यं भवतीति प्रसिद्धिः। पूज्याराध्यदेवानां प्रत्यनादरस्यभावनां मनुण्यान् पतनमार्गेनियति। यथा–

**अवजानासि मां यस्मादतस्ते न भविष्यति।**

**मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।।रघु.१/७७।।**

अर्थात्– यस्मात्कारणात् माम् तिरस्करोषि। अतः कारणान्ममसंततिमसेवयित्वा तव प्रजा न भविण्यतीति सुरभिस्त्वां शशाप। वैदिक तथा पौराणिकदेवानां वर्णनं तस्य ग्रन्थेषु सर्वत्रोपलभ्यते। देवतासु–इन्द्राग्नि–वरुण–सूर्य–यम–त्वष्टा–द्यावा–पृथिवी–रुद्रादि प्रमुखा सन्ति।

**उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ।।रघु.३/२३।।**

एतदतिरिक्तम् ब्रह्मा – विष्णु – महेश – कुबेर – स्कन्दादीनाभुल्लेखोऽस्ति। विष्णवे–पुरुषोत्तमः त्रिविक्रमः पुण्डरीकाक्षः, अच्युतः, कृष्णः, नारायणः, एवंरित्या–शिवाय–ईश्वरः, परमेश्वरः, अष्टमूर्तिः शूलपाणिः स्थाणुः नीललोहितः पिनाकीत्यादि नामानि भिन्न भिन्न प्रसङ्गेषु व्यवहृतानि सन्ति।

शची सरस्वती, लक्ष्मी, पार्वत्यादि देवीनामपि वर्णनं प्राप्यते। उज्जयिन्याः

---

१. कुमारसम्भव –५/८६, २. रघुवंश –१७/१

महाकालस्य तथा वाराणसे विश्वेश्वरस्य मन्दीराणामुल्लेखः महाकवे ग्रन्थेषु प्राप्यते। मेघदूते महाकालस्योल्लेखो यथा–

**अप्यन्यस्मिन् जलधर! महाकालमासाद्य काले,**

**स्थातव्यं ते नयनविषयं यावदत्येति भानुः।**

**कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया–**

**मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्।।[१]**

अर्थात्– हे मेघ ! सन्ध्याऽतिरिक्तायामपि वेलायां महाकालेश्वरं प्राप्तस्त्व सूर्यास्तमयकालपर्यन्तं प्रतीक्षस्व। सन्ध्यायां शङ्करस्य पूजा समय ईषद्गम्भीरं गर्जस्त्वं पटहभावं प्राप्य गर्जितानां समग्रं फलं प्राप्स्यसि। रघुवंशे–विश्वेश्वरस्य वर्णनम् यथा–

**आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेविश्वसहो विजज्ञे।**

**पातुं सहो विश्वसखः समग्रां विश्वम्भरामात्मजमूर्तिरात्मा।।रघु.१८/२४।।**

**निष्कर्षः –**

कालिदासस्य समस्तग्रन्थानामनुशीलनेन तस्य ग्रन्थेषु वर्णाश्रमधर्मस्य महत्त्वं प्रदर्शितमस्ति। यद्यपि कालिदासो मुख्यतया शृङ्गाररसकविः कथ्यते तथाऽपि–अस्य काव्य –नाटकेषु–वर्णाश्रमव्यवस्था मानवस्य जीवनशैलीनां वर्णनं यथा रघुवंशेप्रतिपादितमस्ति यद्राज्ये विभिन्नजातीयाः जनाः स्व स्व कर्तव्यपालनं कुर्वन्ति । सर्वे श्रेष्ठ राजानः सततं सावधानास्तिष्ठन्ति स्म। दिलीपादीनां राज्ञां राजव्यवस्था वर्णनप्रसङ्गे कविनिवेदनमपि निर्दिष्टमस्ति यद् ब्राह्मणादिवर्णद्वारा स्मृत्युक्तनिजकर्मसम्पादनेन सर्वत्रराज्ये सुखसमृद्धिः प्रसरति , जनाः दीर्घजीविनो भवन्ति, तेषामुपरि मानवीदैवीविपदश्च नापतन्ति। वर्णधर्मेणसहेवाश्रमधर्मोऽपि कालिदासेन प्रधानः कल्पितोऽस्ति। अतः कालिदासस्य कृतयः धार्मिकदृष्ट्यापि महत्वस्थानं भजन्ते।

---

१. मेघदूत– पू.मे.३४

## ४. कालिदासकृतीनां राजनैतिकदृष्ट्या वैशिष्ट्यम्।

महाकविः कालिदासेन स्वग्रन्थेषु राजनीतेः विषयेऽपि वर्णनं कृतमस्ति। तस्य रचनाभिः ज्ञायते यदस्माकं राजनीतिः राज्यं सप्तभागेषु विभाजनं करोति। रघुवंशे–

**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।**

**दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम्।।१/६०।।**

अत्र राजा गुरुं राज्ये सर्वकुशलमस्तीति श्रावयन् कथयति–

**"हे गुरो मम राज्ये स्वाम्यमात्यादिषु सप्तस्वङ्गेषु कुतो न कुशलं स्याद्? यस्य मे दैवी मानुषी प्रभृतिविपत्तिनिवारणाय प्रभुस्त्वंमद्गुरुर्विद्यमाने स्वतः सर्वत्र कुशलमेव।"**

अनेन श्लोकेन कानि सप्ताङ्गानि सन्ति, तस्य ज्ञानं न भवति। परन्तु सुधा **श्री ब्रह्मशंकर शर्मणा** कृत सुधाख्य व्याख्यायां पृथक्–पृथक् राज्याङ्गस्य सप्तनामानि – उल्लिखितानि सन्ति । अमरकोशे सप्ताङ्गानां नामानि। यथा–

**स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च।–क्षत्रियवर्गः– १७।**

राज्यरूपी शरीरस्येतानि सप्ताङ्गानि सन्ति, एषु सप्ताङ्गेषु राजा मस्तकं भवति। अतः गणनायां प्रथमो राजा वर्तते।

### ❖ राजा।

रघुवंशस्य प्रथमसर्गे सूर्यवंशी आदर्शनृपाणां वर्णनं प्राप्यते। यथा–

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।**

**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।**

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।**

**यथाऽपराधदण्डानां यथाकालप्रबोधिनाम्।।**

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।

शैशवऽभ्यस्तविद्यानां यौवने विषणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।

तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।।(रघु. ५,६,७,८,९)

अर्थात्– कविः कथयति– नाहमल्पवचनप्रसारः स्वयं रघुवंशविषयक प्रबन्धं रचयितुमुद्यतः, किन्तु रघुकुलगुणानाप्रेरणयेति। मगधनरेशस्य प्रशंसायां तम् 'अगाध सत्वः' शरणागतान् शरणार्थोः 'प्रजारञ्जनलब्धवर्णः' कथयित्वा अन्य नृपेषु तस्य श्रेष्ठता कविः दर्शयति। यथा–

कामं नृपाः सन्तु सहस्त्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।

नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः।।रघु.६/२२।।

अर्थात्–अन्याः निश्चयं सहस्रशः राजानः भवन्तु, परन्तु भूमिमनेन शोभनराजवती कथयन्ति, नैतादृक् कश्चिदस्त्यिन्यराजेति तात्पर्यः। अश्विन्यादिभिस्ताराभि भौमादिभिश्च सङ्कुलापि रात्रिश्चन्द्रमसैव ज्योतिष्मती नान्येन। नृपं कालिदासकाले राजा, भगवान्, प्रभु, जगदेकनाथः, ईश्वरः, जनेश्वरः, देवः नरदेवः, नरेन्द्रः सम्भवः, मनुष्यदेवादि विशेषणैः सम्बोध्यते स्म। यथोदाहरणानि–

- प्रभुः–"मत्वा भवन्तं प्रभु शब्द शेषम्" ।रघु.५/२२।।
- जगदेकनाथः– जगादभूयो जगदेकनाथः ।रघु.५/२३।।
- ईश्वरः– 'तस्मिन् प्राग्ज्योतिषेश्वरः ।रघु.४/८१।। कामरूपेश्वरस्तस्य ।रघु.४/८४।।
- ईशः– तमीशः कामरूपाणाम् ।रघु.४/८३।।
- मनुष्येश्वरः– मार्गं मनुष्येश्वरधर्मपन्ती ।रघु.२/२।।
- जनेश्वरः– निशम्य जनको जनेश्वरः ।रघु.२/३५।।
- नरदेवः– सोमार्कवंश्ये नरदेवलोके ।रघु.६/८।।

➢ मनुष्यदेवः– मनुष्यदेवः पुनरप्युवाच ।रघु.२/५२।।

➢ भगवान्ः– राज्ञः ईश्वरीयरूपस्यदर्शनं शुभं मन्यते स्म, अस्याऽभिष्ट सिद्धयर्थं लोकाः राजप्रासादस्य समीपे एकत्रिताः भवन्ति स्म।

रघुवंशे– **गौरवाद्यपि जातु मन्त्रिणां दर्शनं प्रकृतिकाङ्क्षितं ददौ।**

**तद्गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितम्।।**[1]

## ❖ राज्य–परिच्छदः।

राज्ञः राज्यलिङ्गं, परिच्छदः, राजककुदः, नृपककुदः, राज्यचिह्नम्, पार्थिवलिङ्गमित्यादि नामभिः सूच्यते स्म। राज्यलिङ्गार्थं कालिदासेन परिच्छदः शब्दस्य प्रयोगः कृतोऽस्ति। यथा रघुवंशे–

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।**

**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता।।रघु.१/१९।।**

अर्थात्– तस्य दिलीपस्य सेना प्रयोजनसम्पादिका नाभूत् केवलं तु शोभार्थमेव किन्तु राजनीति विषया तदीया मतिः सज्यं शरासनञ्चेति द्वयेनैव सकलार्थसिद्धिरभूत्। नृपस्य परिधानम् आभूषणं वा परिच्छदो भवति, य साधारणार्थे राजकीय बाह्योपकरणं, राज्यचिह्नार्थं व्यवह्रियते। कविः राज्यचिह्नेषु सिंहासनं, राज्यक्षत्रं, चमरं, मध्यरत्नजटितमुकुटः राजदण्डं, विजयशङ्खः, वितानं, सुवर्णमयीपादपीठिकायाश्चोल्लेखः कृतवान्नस्ति। यथा सिंहासनस्योल्लेखः रघुवंशे–

➢ स तत्र मञ्चेषु मनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु।।६/१।।

➢ सिंहासनार्धभाक्।।१७/७।।

➢ मौलैः सार्धस्थविरसचिवैर्हेमसिंहासनस्था।।१९/५७।।

- **राज्यक्षत्रस्य चर्चा रघुवंशे–**

➢ तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे।।२/१३।।

➢ एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।।२/४७।।

---

१. रघुवंश– १९/७

➢ पद्मापद्मातपत्रेण भेजेसाम्राज्यदीक्षितम्।।४/५।।

- चमरस्योल्लेखः यथा रघुवंशे–

➢ शशिप्रभं छत्रमुभे च चामरे।।३/१६।।

➢ आधूतबालव्यजनो रथस्थः।।१४/११।।

➢ पर्यन्तसञ्चारितचामरस्य।।१८/४३।।

- **कुमारसम्भवे–**

➢ यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः।।१/१३।।

- **विक्रमोर्वशीयं नाटके–**

➢ व्याधूयन्ते निचुलतरुभिर्मञ्जरी चामराणि।।४/१३।।

- **मुकुटस्य प्रयोग रघुवंशे–**

➢ व्यापारयामास करं किरीटे।।६/१९।।

➢ दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।।१०/७५।।

- गुप्तनृपाणां राज्ये तेषां स्तुतिगाथकाः भवन्ति स्म, तथैवप्रकारेण रघुवंशीयनृपाणां तथा तेषां पूर्वजानाञ्च स्तुतिपाठकाः वन्दीजनादिरासन्।–

➢ सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम्।।रघु.३/१९।।

➢ वन्दिनो नीलकण्ठाः।। विक्र. ४/१३।।

➢ नौ संश्रयः पार्श्वगतां किरातीम्।।रघु. १६/५७।

- नृपस्योपवेशनार्थं सुन्दरं सभाभवनं भवति स्म।

➢ तदद्भूतं संसदि रात्रिवृत्तिम्।।रघु. १६/२४।।

- नृपाय एकं क्षत्रं, द्वेव चामरे च अनिवार्यारासान्। इमानि राजपदस्य मुख्यचिह्नानि भवन्ति स्म। कस्यामपि अवस्थायां एषां चिह्नांनां त्यागोऽशक्यमासीत्। रघुवंशे–

➢ अदेयमासीत् त्रयदेवभूपतेः शशिप्रभं छत्रमुभे च चामरे।।३/१६।।

- प्राचीनकालस्य नृपाणां वर्णनप्रसङ्गे एतानि नामानि आगच्छन्ति, तथापि कवेः समयेऽपि राज्यलिङ्गरूपे – आगच्छन्ति स्म। सिंहासनं राजकीयोमुख्यमासनमासीत्। तत्

रत्नजटितसुवर्णनिर्मितं भवति स्म। रघुवंशे–

➤ हैमसिंहासनस्था।।१९/५७।।

- टी.ए. गोपीनाथो रावः महोदयानां शब्देषु– अस्य सिंहासनस्य व्याख्या– "एक हस्तप्रमाण ऊंचा वृत्ताकार अथवा आयताकार चतुष्पाद आसन् इस आसन के चारों पाद चार लघुकाय–सिंहाकार के होते हैं। जो सुवर्ण–निर्मित न होकर केवल रत्नजटित होते थे, नृपासन या भद्रासन कहलाते थे।"–कालिदास का भारत भाग १ पृ.१३५,

❖ **राज्ञो व्यक्तिगतगुणाः ।**

कविः शासकस्य योग्यगुणान् समर्थयन् कथयति यत् राजा अग्रजन्माऽपिभवितव्यः। रघुवंशे–

**अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुराजन्मतया गुणाश्च।**

**चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारी।।**[१]

सर्व प्रथमं कवेः दृष्टौ नृपः पुष्टाङ्गं भवितव्यं, यतो हि राजा स्वस्थशरीरेणैव रक्षायाः कार्यसम्पादनं सम्यग् प्रकारेण कर्तुं शक्नोति, यो राज्ञो मुख्यधर्मोऽस्ति। रघुवंशे–

**व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।**

**आत्मकर्मक्षमं देहं क्षात्त्रो धर्म इवाश्रितः।।१/१३।।**

अर्थात्– दिलीपः मूर्तिमान्क्षात्त्रधर्मः पराक्रम इव स्थितः। राजा अदम्यसाहसी तथा आत्मरक्षार्थं योग्यः स्यात्। यथा–

**जुगोपात्मानमत्रस्तो भेजे धर्ममनातेरः।।**[२]

सः राजा धर्मशास्त्राणां, तथा अनेकविद्यानां स्पष्टज्ञाता भवेत्, यस्य सहायेन सम्यक्तया न्यायसम्पादनं कुर्यात्।यथा–

**अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।**

**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना।। रघु.१/२३।।**

अर्थात्– विषयेभ्यो विरक्तोऽधीततवेदवेदाङ्गसकलविद्योधर्माचरण तत्परो दिलीपो युवाऽपि सन् वृद्ध इवाभूत्। व्यक्तिगतगुणानामिव कालिदासः नृपेषु सामाजिकगुणानामावश्यकतां स्वीकरोति। तस्य दृष्टौ राजनि कीदृशाः गुणा भवितव्याः रघुवंशे उल्लेखो वर्तते। यथा–

१. रघुवंश –१६/१, २. – १/२२

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा।

तथैव सोऽभूदन्वर्थो राजा प्रकृति रञ्जनात्।।रघु.४/१२।।

अर्थात्– यथा आह्लादकरणात् चन्द्रोऽनुगतार्थनामकोऽभूतम्। यथा च सूर्यः सन्तापजननादन्वर्थः। तथैव प्रकृतिरञ्जनाद् राजशब्दो सार्थकोऽभूत्। नृपेण दक्षिणवायुरिव "नातिशीतोष्णः" भवितव्यः, प्रजासु विश्वासः सम्पादनीयः। राज्यस्थप्रत्येकजनस्यहृदये एतादृशी भावना स्यात् यदहं नृपस्य विशिष्टकृपा–भाजनः। रघुवंशे–

अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत्।

उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना कचित्।।रघु.८/८।।

अर्थात्–उदधेर्निम्नगाशतेष्विवास्य नृपस्य क्वचिदपि जनविषये अवगणा तिरस्कारो नाभवत्। नृपेण एतदपि ध्यानं दातव्यं यद् प्रजासु असन्तोषः अश्रद्धायाश्च भावना 'प्रकृति वैरण्यं' न आगच्छेत् तदर्थं नृपेण प्रसन्नोभूत्वा मधुरस्मितहास्येन सह सम्भाषणं कर्तव्यम्। यथा–

प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम्।

मूर्तिमन्तममन्यन्त विश्वासमनुजीविनः।।रघु.१७/३१।।

अर्थात्– स्मितपूर्वं यथा तथाऽभाषणशीलं तं सेवकाः विग्रहवन्तं विस्रम्भममन्यत नृपः ब्राह्मणानां प्रति श्रद्धावान् भवेत्, तेन राज्यस्य कल्याणो भवति। ब्राह्मणकृतयज्ञैर्बालमृत्युः ज्वरादि दैवी आपत्तयः स्वयमेव नश्यन्ति। रघुवंशे यथा–

हविरावर्जितं होतस्त्वया विधिवदग्निषु।

वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम्।।१/६२।।

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।

यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम्।।१/६३।।

अत्र राजा दिलीपः कथयति– हे यज्ञकर्त्त ! त्वमाज्यादिकं यदग्नौ मत्कल्याणार्थं जुहोषि, तदेव वृष्टिर्भूत्वा सस्यानामुपजीवकम् भवति–अतोऽस्मद्राज्ये कुतो दैवीनाम् मानुषीणाञ्चापदां सम्भवस्यात्। मदीयाः प्रजास्त्वदनुष्ठितव्रतवेदवेदाङ्गाध्ययनसम्पत्त्यैव दीर्घजीविन्यो निभर्याः सप्तविधोपद्रवेनातिवृष्ट्यादिकेन रहिताः सन्ति नान्येन हेतुना। राज्ञः

जीवनं बन्दीगृहमिव कथितं वर्तते। यत्र कर्तव्यस्य गहनभारेण भारान्वितो भवति। यथा–

**सुखानि सोऽभुङ्क्तसुखोपरोधिवृत्तं हि राज्ञामुपरुद्धवृत्तम्।।रघु.१८/१८।।**

अभिज्ञानशाकुन्तलस्य पञ्चमोऽङ्के राज्ञः कठिनदायित्वस्य स्पष्टवर्णनं वर्तते। यथा–

**भानुःसकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।**

**शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः।।**[१]

अर्थात्– लोकरक्षायै भगवान्भाष्करः युगादावेकवारमेव स्वरथे नियुक्ततुरङ्गमोऽद्य यावत भ्रमत्येव। प्राणधारको वायुः अहोरात्रं प्रवहति। एवं शेषनागोऽपि सर्वदैव शिरो धृतधरित्रीमण्डलः तिष्ठति। प्रजोपार्जितधनादितः षष्ठमागाधिकारिठो राज्ञोऽपि प्रजापालेनऽविश्रामः आवश्यककर्तव्यो वर्तते। राज्ञां स्वीयं प्रजापालनात्मकं कर्तव्यमनुतिष्ठतां क्षणमात्रमपि विश्रामस्यावसरोऽपि न भवत्तीति। अन्यच्च–

**प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम्।**

**यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः।।अभि.५/५।।**

अर्थात्– एष महाराजो दुष्यन्तो न्यायासनादुत्थाय एकान्ते स्वैरमुपविष्टोऽस्ति। यथा गजराजः आहाराद्यन्वेषणार्थं गजवृन्दं संचार्य मध्याह्ने सूर्यतापम् असहिष्णुः सन् प्रच्छाय शीतले प्रदेशे किञ्चित्कालं विश्रम्य पुनः स्वकीयं यूथं सञ्चारयति तथैवायमपि महाराजो दुष्यन्तः प्रजाकार्यकरणपरिश्रान्तः सन् विश्रमार्थं क्षणं तिष्ठति विश्रान्तश्च भूयोऽपि स्वधर्मं प्रजापालनकार्यं करिण्यतीति। राज्ञः व्यक्तिगुणवर्णन प्रसङ्गे कविः पुनः वदति यत् राजा चरित्रवान् पापवृत्तिहीनश्च भवेत्। रघुवंशे –

**अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।**

**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना।।**[२]

शुक्रनीतिः कथयति यत् अत्यन्तभीरुः, दीर्घसूत्री, प्रमादी तथा विषयासक्त नृपं प्रजाः न सेवन्ते। यथा शुक्रनीतौ–

**अतिभीरुमतिदीर्घसूत्रं चाति प्रमादिनम्।**

**व्यसनाद्विषयाक्रान्तं न भजन्ति नृपं प्रजाः।।**

**–राज्यकृत्याधिकारः श्लोक.१०६ व्या.डॉ. उमेशपुरी ज्ञानेश्वर।**

---

१. अभिज्ञानशाकुन्तल –५/१, २. रघुवंश – १/२३

अतः राजा सदा जितेन्द्रयो भवेत्। नीतिशास्त्रनुगामिन, राज्ञः यशोस्वर्ग पर्यन्तं गच्छति। लक्ष्मीश्च तं सदा भजते। यथा शुक्रनीतौ–

**जितेन्द्रियस्य नृपते नीतिशास्त्रानुसारिणः।**

**भवंत्युच्चलितालक्ष्म्यः कीर्तयश्च नभः स्पृशः।।–अध्याय १ राज्यकृत्याधिकारः श्लोकः११४।।**

शुक्रनीतिः योग्यराजा चयन विषये 'अग्रजन्मप्रथां' विहाय राज्ञः गुणान् महत्वं ददाति। तस्य कथनमस्ति–

**पूज्यस्त्वेभिर्गुणैर्भूपो न भूपः कुलसम्भवः।**

**न कुले पूज्यते यादृग्वलशौर्यपराक्रमैः।।[1]**

महाकविः कालिदासस्य ग्रन्थेषु राजनीति विषये गहनाऽध्ययनेन 'नृपस्य व्यक्तिगतगुण' विषये इमं निष्कर्षं दातुं शक्यते यत् कालिदासस्य अस्मिन् विषये शुक्रनीतिरनुगमनं वर्तते। यतः कालिदासोऽपि चारित्र्य–विनय शीलता–इन्द्रियनिग्रहादिगुणान् महत्वं ददाति।।इति।।

❖ राज्ञः कर्तव्यम्।

कालिदासस्य रचनासु राज्ञः कर्तव्यानां प्रचूरवर्णनं प्राप्यते। दशरथादि श्रेष्ठनृपाणां कृते मृगया मदिरासेवनं, द्यूतक्रीडा नवयौवनादि सेवनकार्यं वर्जितमस्ति। रघुवंशे–

**न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु।**

**तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत्।।[2]**

परन्तु मर्यादायां मृगयार्थम् अनुमोदनमपि प्राप्यते, यतः तया शरीरे शक्तिः स्फूर्तेश्च वृद्धिर्जायते। रघुवंशे–

**परिचयं चललक्ष्यनिपातेन भयरुषोश्च तदिङ्गितबोधनम्।**

**श्रमजयात्प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ।।९/४९।।**

अभिज्ञानशाकुन्तलस्य द्वितीयोऽङ्के मृगयायाः गुणत्वं समर्थयन् सेनापतिमुखेन कविः वदति–

**अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।**

**अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं बिभर्ति।।अभि. २/४।।**

१. शुक्रनीति – १/१३०, २. रघुवंश –९/७

अन्यच्च—

**मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः,**

**सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।**

**उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले,**

**मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः।। अभि. २/५।।**

अर्थात्— मृगयायामितस्ततो धावनेन वसायाः कार्श्यात् शरीर स्फूर्तिशीलं भवति, लक्ष्यवेधावसरे भयेनपलायमाणां हरिणादीवामिङ्गितानि ज्ञायन्ते, उत्थायोत्थाय निर्भरं धावति परित्रस्ते मृगेऽपि लक्ष्यकौशलं सिद्धयति, संमुखे व्यादाय समुत्पतिष्णोः शार्दूलस्य कण्ठे भल्लोत्क्षेपणे महती आनन्दानुभूतिर्भवति। मृगयासक्तचेतसां पुंसां दिनमनायासेन गच्छति मृगया मनोविनोदं सम्भवतीति। राज्ञः कर्तव्यवर्णनप्रसङ्गे कालिदासः राज्ञः परिभाषा कुर्वन् कथयति् यो राजा प्रजान् रञ्जयति सैव राजा। रघुवंशे—

**राजा प्रकृतिरञ्जनात्।।४/१२।।**

नृपेण प्रजारञ्जने प्रवीणो भवितव्यः। यदा तस्य दयालुतापूर्णशासने प्रजाः प्रसन्नाः भवन्ति स्म, तदा राज्ञः प्रशंसा भवति स्म। रघुवंशे—

**राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा।।[1]**

विक्रमोर्वशीयम् नाटके—

**प्रविश्य नगरमिदानीं ससत्कारोपचारैः प्रकृतिभिरनुरज्यमानो राज्यं करोति। (५/ पृ. १६९ कालिदास ग्रन्थावली)**

प्रजा—जनेषु के प्रसन्नाः सन्ति ? के राज्याधिकारिवर्गैः पीडिताः सन्ति ? अस्य निरीक्षणार्थं नृपं राज्ये भ्रमणस्य विधानं तथा प्रजानां प्रसन्नतायै गजारोहणस्यादेशमपि ददाति शुक्रनीतिः। यथा—

**ग्रामान्पुराणि देशांश्च स्वयं संवीक्ष्य वत्सरे।**

**अधिकारिगणैः काश्च रंजिताः काश्च कर्षिताः।।अ.१ पृ.१९३ राज्यकृत्याधिकार।।**

गुप्तलेखेऽपि राज्ञः मुख्यलक्षणं प्रजारञ्जनं कथितमस्ति।

---

१. रघुवंश – ६/२१,

संरंज्यां च प्रकृतिर्बभूव पूर्वस्मिताभाषणमानदानैः।।

(गुप्तसंम्राट स्कंदगुप्तनो गिरनार शैललेख।पृ.१६)

अन्यच्च–

सवंर्धित प्रीतिगृहोपचारैः।।पृ. २६ (१४)

कालिदासः स्वग्रन्थे लिखति यत् राजा सूर्येव दिनस्य षष्ठप्रहरसमाप्तौ विश्रामः करोति स्म। शाकुन्तले–

षष्ठांशवृत्तरपि धर्म एषः।।५/४।।

एकस्मिन् स्थले कालविभागस्यापि संकेत प्राप्यते। रघुवंशे–

स पौरकार्याणि समीक्ष्य काले।।१४/२४।।

विक्रमोर्वशीयम्– नाटके– **षष्ठेकाले त्वमपि लभसे देव विश्रान्तिमह्नः।।**[१]

मालविकाग्निमित्रे–वैतालिकः– **"उपारूढो मध्याह्नः।"**[२]

राजनीति शास्त्रस्य नियोगानुसारेण राजा स्वकार्यक्रमः स्वयं निश्चयं करोति। रघुवंशे–

रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम्।

तत्सिषेवे पियोगेन स विकल्पनराङ्मुखः।।१७/४९।।

अर्थात्– अहोरात्रयोः अंशाः प्रहरादयः राज्ञम्– अस्मिन् काले कर्तव्यमिति मन्वादिरुपदिष्टं तत्स राजा संशयरहितः सन् निश्चयेव अनुष्ठितवान्। आर्तानां रक्षणाय – अजः शक्तेरूपयोगं करोति, तथा स्वबुद्धिकौशलेन पण्डितानां सम्मानेन सह धन–वैभवैः परोपकारः करोति स्म। रघुवंशे–

बलमार्तभयोपशान्तये विदुषां सत्कृतये बहुश्रुतम्।

वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना।।रघु.८/३६।।

अतिथिर्विषये कविः कथयति–

---

१. विक्रमोर्वशीयम् – २/१,

२. मालविकाग्निमित्रम् – २/ पृ.२०२ श्लोक १२

अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः।

अतः सोऽभ्यन्तरान्नित्यान्षट् पूर्वमजयद्रिपून्।।१७/४५।।

अन्यच्च– न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ।

नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु।।१७/५७।।

राजकीय रक्षणार्थे 'गोप्ता' शब्दस्य प्रयोगः कृमस्ति। रघुवंशे–

शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।

ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने।।२/१४।।

अर्थात्– जगत्पालकस्य राज्ञो दिलीपस्य प्रभावातिशयेन वनप्रदेशक्षण एव वनाग्निः स्वयमेव शान्तोऽभूत्, फलपुष्पवृद्धिः विशिष्टा जाता, प्राणिषु च वैरत्यागः जातः।

अन्वास्य गोप्ता गृहिणीसहायः।। रघु. २/२४।।

'विक्रमोर्वशीयम्' नाटके–

गोप्तुरेव गृहे कृतम्।।[१]

स्कन्दगुप्तस्य जूनागढस्थ शिलालेखे तथाऽन्य शिलालेखेष्वपि 'गोप्ता' शब्दः प्रान्तीय शासकस्यार्थेव्यवहृतोऽस्ति।

'सर्वेषु देशेषु विधाय गोप्तृ।' (गुप्त सम्राट स्कंदगुप्तनो गिरनारशैललेखे– पृ.२५ {६})

अन्यच्च– तत्रैव द्वितीय खण्डे

'द्वीपस्य गोप्ता महतां च।।' (पृ. २८ {२४})

दिलीपस्य गुणानां वर्णने कालिदासः यां परम्परामनुसरति, सा गुप्तकालीशैल्याः दृष्टौ अप्रसांगिको नास्ति। येन प्रकारेण पिता स्वबालकान् सावधानतया रक्षति, तथैव राजाऽपि प्रजान् रक्षेत्। रघुवंशे–

प्रजाः प्रजानाथ पितेव पासि।।२/४८।।

---

१. विक्रमोर्वशीयम् – ५/१

राजा एवं कथयन् हर्षमनुभवति यत् ममराज्ये कोऽपि दुर्विनीत दुष्टाचरणं कर्तुं नोत्सहे। शाकुन्तले–

**कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।।**[1]

एवं प्रकारेण सर्वाङ्गपूर्ण रक्षणे निर्भयाः प्रजाः उन्नतिं कुर्वन्ति। या 'मालविकाग्निमित्रस्याऽस्मिन् श्लोके–

**"आशास्यभीतिविगमप्रभृति प्रजानां संपत्स्यते न खलु गोप्तरिनाग्निमित्रे।।"**[2]

जूनागढस्य शिलालेखे स्कन्दगुप्तस्य सम्बन्धे कथितं वर्तते। यथा–

**तस्मिन् नृपे शासति नैव कश्चिद्धर्मादपेतो मनुजः प्रजासु।**

**आर्त्तो दरिद्रो व्यसनी कदर्यो दण्ड्यो न वायो भृशपीडितः स्यात्।।**

**–गुप्त सम्राट स्कंदगुप्तनो गिरनार शिलालेख.१ –६ पृ.२५**

रक्षायाः कर्तव्य सम्पादनं विहाय तं न्यायासनोपरि–उपविस्य निर्णयार्थं प्रेषितकार्याणां निर्णयमपि दीयते स्म। रघुवंशे–

**नृपतिः प्रकृत्तीरवेक्षितुं व्यवहारा सनमाददे युवा।८/१८।।**

एतत् कार्यं स्व निश्चित कार्यक्रमानुसारेण करोति स्म।

**"स पौर कार्याणि समीक्ष्य काले।।"**[3]

रघुवंशे वर्णनमागच्छति यत् शिक्षा विनयादि गुणैः युक्तं युवराजं युवराजपदे नियोजयते स्म, येन सः राज्यसंञ्चालनं सम्यक् कुर्यात्।

**ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वी लघयिष्यता धुरम्।**

**निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्।।३/३५।।**

❖ **अमात्यः।**

शासन सञ्चालने राज्ञः मन्त्रिमण्डलं तस्य सहायता करोति स्म। यस्य लाक्षणिको नाम अमात्यपरिषदः, मन्त्रिपरिषदः वा भवति स्म। मालविकाग्निमित्रस्य पञ्चमोऽङ्के

---

१. अभिज्ञानशाकुन्तल –१/२४, २. मालविकाग्निमित्रम् –५/२०, ३. रघुवंश – १६/२४

उल्लेखो वर्तते।

**मन्त्रिपरिषदोऽप्येतदेव दर्शनम्। का.ग्रन्था.प्र.खण्ड पृ.२५० माल.अंक–५**

**तेन हि मन्त्रिपरिषदं ब्रूहि। माल.अंक .५।**

कालिदासः मन्त्रीणां प्रधानतायाः वर्णनं करोति, सम्पूर्ण शासनकार्य तेषां हस्ते भवति स्म। यदा राजा राज्यात् बहिर्गच्छति स्म, तदा शासनस्य सम्पूर्ण दायित्वं मन्त्रिषु निक्षिप्य गच्छति स्म। रघुवंशे यथा–

**तारिता।सन्तानार्थाय विधये स्वभुजादव**

**तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।१/३४।।**

अर्थात्– पुत्रप्रयोजकमनुष्ठानं कर्तुं समुत्सुको दिलीपो राज्यभारं मन्त्रिषु स्थापयामास।

**सचिवावलम्बितधुरं धराधिपम्।।रघु.१/६९।।**

**सन्निवेश्य सचिवेष्वतः परम्।।[1]**

अभिज्ञानशाकुन्तले–

**त्वन्मतिः केवला तावत्परिपालयतु प्रजाः।।[2]**

कालिदासः मन्त्री–अमात्य–सचिव शब्दान् स्व ग्रन्थे पर्याय रूपेण प्रयोजयति। रघुवंशे–

**अजिताधिगमाय मन्त्रिभिर्युयुजे।।८/१७।।**

**तनुमतोऽनुमतः सचिवैर्ययौ।।९/४९।।**

**वृद्धैरमात्यैः सह चीरवासा।।१३/६६।।**

परन्तु मनुः प्रधानमन्त्रिणम् अमात्यः कथयति(मनुः ७/६५)। शुक्रनीतिः तु मन्त्र्यैव कथयति। यथा–

**मन्त्री तु नीतिकुशलः पण्डितो धर्मतत्ववित्।**

**लोकशास्त्रनयज्ञस्तु प्राड्विवाकः स्मृतः सदा।।[3]**

कालिदासः उक्तप्रकारेण कोऽपि भेदः नैव स्वीकरोतीति।

## ❖ कोषः।

राज्यकोषस्य पूर्तिः, करविधानादिविषये कालिदासः स्पष्टवक्ता वर्तते। सः कथयति प्रजायाः सम्पतेः षष्ठभागग्रहणं, तथा स्वयं राज्योऽपि शस्योत्पादन रत्नादिखनिज–वन्यहस्ति व्यापारैः राज्यकोषंवर्धेत्। रघुवंशे–

**खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान्।**

**दिदेश वेतनं तस्मै रक्षासदृशमेव भूः।।१७/६६।।**

---

१. रघुवंश –१९/४, २.अभिज्ञानशाकुन्तल –६/३२, ३.शुक्रनीतिः अ.२ युवराजादिलक्षण–पृ.६०/५२

निकटस्थ उत्तराधिकारीजनस्याऽभावे मृतव्यक्तेः सम्पत्ति राज्यकोषस्याधिकारे गच्छति स्म। परन्तु कवेः आदर्शराजा दुष्यन्तः अस्य नियमस्य कठोरतां करुणाय न्यूनीकृत्य प्रजायादुःखे समभागी भवति स्म। राजा दुष्यन्तः शाकुन्तलस्य षष्ठोऽङ्के समुद्र व्यापारेरनपत्यता तथा नौव्यसने तस्य मृत्युर्निशम्य राजा कथयति। यथा–

**बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्।**

**विचार्यतां यदि काचिदापन्नसत्त्वा तस्य भार्यासु स्यात्।(षष्ठोऽङ्के/पृ.३४१)**

उक्तकथनस्य तात्पर्यमिदमस्ति, यत् कोऽपि जनस्य निःसन्तानमृते सति यदि तस्य पत्नी आपन्नसत्वा – अस्ति तर्हि पितुः सम्पत्तेरधिकारी गर्भस्थ शिशुः भविष्यति। अनेन कथनेन राज्ञः प्रजाप्रति दीर्घदृष्टिः वात्सल्यभावनाञ्च दरीदृष्यते। अर्थकोषस्य सञ्चयोप्रजायाः कल्याणार्थ भवति स्म। रघुवंशे–

**कोशेनाश्रयणीयत्वमिति तस्यार्थसङ्ग्रहः।**

**अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते।।**[१]

अर्थात्– अर्थसञ्चयेन भजनीयत्वं भवतीति हेतोस्तस्य राज्ञः अर्थसंग्रहः न तु लोभात्। यथा पुटबन्धो मेघः चातकैः सेव्यते।

❖ **रक्षा–विभागः।**

कालिदासकाले रक्षाविभागस्य प्रधानः नागरिकः आसीत्, यः राजधान्या रक्षाविभागतः सम्बद्धो भवति स्म। शाकुन्तले तमधिकारीं रक्षिणः साकं एकाऽपराधिं न्यायालये नयन् वयं पश्यामः। षष्ठोऽङ्कस्य प्रारम्भे।–

**ततः प्रविशति नागरिकः श्यालः पश्चाद् बद्धपुरुषमादाय रक्षिणौ च। पृ.२८०**

'विक्रमोव्रशीयम्' नाटकेऽपि नगरस्य नागरिकः शासनव्यवस्थायां सम्बद्धोस्ति। अतः तत्राऽपि तं राजा नगररक्षाविभागस्य कार्यकर्तुमादेशति। राजा वदति–" **मद्वचनादुच्यतां नागरिकः। सायं निवासवृक्षाश्रयीविचीयतां स विहगदस्युरिति।"(विक्र. अङ्क –५)**

'विक्रमोर्वशीयम्' नाटके राजा यं नागरिकं संकेतयति सः शाकुन्तलस्य नागरिकतः उच्चश्रेण्याऽधिकारी प्रतीयते। शाकुन्तलस्य रक्षकौ नागरिकस्याऽनुगमनं कुरुतः। १.

---
१. रघुवंश – १७/६०,

तयोर्मानसिकता— अद्यत्वे ये राजपुरुषा:( POLICEMEN) सन्ति तैर्सह मिलति तयोरेको रक्षक: वदति।— "जानुक, प्रस्फुरतो मम हस्तावस्य सुमनसः पिनद्धुम्।।अभि.६/पृ.२८६।।

अर्थात्— अस्य कण्ठे बध्यचिह्नभूतां रक्तपुष्पमालां निक्षिप्य राज्ञाज्ञया एनं हन्तुमुत्सुकोऽहम्। परन्तु यदा अभियुक्तः पुरस्कारेण सह मुक्तो भवति तदा तयोरेक पुरस्कारस्य रुप्यकाणि सेर्ष्यया पश्यति। तथोऽर्थपूर्णभाषायां सः वदति यत् नागरिकेन धीवरस्योपकारः कृतः। तयो मानसिकतां दृष्ट्वा—पुरुषः(धीवरः) वदति—

**भट्टारक इतोऽर्धं युष्माकं सुमनो मूल्यं भवतु।६/पृ.२९०।।**

तदा स्वयंनागरिक: वदति (श्याल:)—

**धीवर महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत:। कादम्बरी साक्षिः कमस्माकं प्रथमशोऽभिमतमिष्यते। तच्छौण्डिका पणमेव गच्छामः।।**[१]

अनेनोद्धरेणाऽनुमीयते यत् रक्षा विभागस्य नैतिकबलमुच्चं नासीत्।

**❖ दण्डनीतिः।**

शासनं सम्यग् प्रचलेत् तदर्थं दण्डनीतेर्व्यवस्थाऽऽसीत्। शासनव्यवस्थायाः सम्यग् प्रचालनार्थमपराधीनांदमनं, तथा तां न्यायाधीशस्य पुरः नयनमावश्यकं वर्तते स्म। रघुवंशे—

- **स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।**
  **अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।।१/२५।।**
- **समतया वसुवृष्टि विसर्जनैर्नियमनादसतां च नराधिपः।।९/६।।**
- **अपराधी शासनीयः।। वि. ५।।**

न्यायव्यवस्था सुदृढाऽऽसीत्। अपराधानुसारेंण दण्डविधानं क्रियते स्म।

**यथाऽपराधदण्डानाम्।। रघु. १/६।।**

राजा निष्कामभावेन रजोगुणरहितो भूत्वा प्रजाशासनं करोति स्म।

**निगृह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः।**
**स भ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास।।** [२]

**अन्ते निष्कर्षः —**

कालिदासेन संसारस्याधिपतिरूपे संयुक्तभारतवर्षस्य कल्पना स्व ग्रन्थेषु कृतमस्ति।

---

१. अभिज्ञानशाकुन्तल — ६/पृ. २९१, २. रघुवंश —१४/८५

रघुवंशी नृपाणां राज्यविस्तारः समुद्रपर्यन्तं निर्दिष्टवान्नस्ति, सम्पूर्णपृथिव्या. एका नगरीव एकच्छत्रराज्यं कुर्वन्ति स्म। रघुवंशीय प्रतापी राजा दिलीपस्य रथः स्वर्गपर्यन्तं गच्छति स्म। अर्थात् स्वर्गपर्यन्तं रथगमानाय मार्गमासीत्। रघुवंशे–

**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।१/५।।**

**स वेलावप्रवलयां परिखीकृतसागराम्।**

**अनन्यशासनामुर्वी शशासैकपुरीमिव।।१/३०।।**

शाकुन्तलैषा भविण्यवाणी वर्तते, भरतः सम्पूर्ण वसुन्धरायाः शासको भविष्यति। यथा–

**पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।।अभि.।।**

नाटकस्य प्रथमोऽङ्के ऋषयः चक्रवर्ती पुत्रप्राप्तेराशीर्वचनं ददति। यथा–

**जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।**

**पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि।।अभि.१/१२।।**

कालिदासस्य कल्पनाऽऽसीत्, यत् राजनैतिक क्षेत्रेऽपि भारतः सम्पूर्णविश्व नायकः स्यात्। अस्य फलस्वरूपेण अद्यत्वेपरिवर्तित युगेऽपि भारतस्यादर्शः विश्वविदुषां मनसि स्थानं धरति। वस्तुतः कलाकारस्य यादृशी प्रवृत्तिर्जायते, यादशी भावना च भवति, तादृशी एव तस्य कलाकृतिरपि संजायते। तथैव महाकवेः कालिदासस्यहृदये स्व राष्ट्रं प्रति याः उच्चभावनाः आसन् ताः सर्वाः प्रतिबिम्बरूपेण तेषां ग्रन्थेषु परितः दरीदृश्यन्ते।।

## ५. कालिदासकृतीनां भौगोलिकदृष्ट्या वैशिष्ट्यम्।

महाकविः कालिदासस्य ग्रन्थानां भौगोलिकदृष्टयाऽपि महत्वं वर्तते। कालीदासकालीन भारतस्य भौगोलिकदृष्ट्या सम्यक् परिशीलनार्थं तस्य ग्रन्थेषु कुत्र कुत्र भौगोलिकचित्रं चित्रितं वर्तते तस्य ज्ञानमावश्यकम्। अतोऽत्र मया तस्य ग्रन्थेषु वर्णित भौगोलिकवैशिष्ट्यं प्रस्तूयते।

### (१) कालिदासग्रन्थे वर्णितसीमाः।

भारतस्योत्तरे दिशौ नगाधिराजः हिमालयो वर्तते, यः पूर्वतः पश्चिमसागरपर्यन्तं पृथिव्याः मानदण्डमिव विस्तृतोऽस्ति। कुमारसम्भवे–

**अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्याः इव मानदण्डः।।**[१]

अस्मिन् श्लोके कविः भारतस्य – उत्तरसीमायारुल्लेखो कुर्वन् हिमालयं भारतीयसीमायाः सागरादारभ्य पश्चिमसागरपर्यन्तं देशस्य रक्षार्थं जागरुको रक्षापुरुष इव वर्णयति। हिमवतः पूर्वपश्चिमसमुद्रव्यापित्वं ब्रह्माण्डपुराणेऽपि – उल्लेखो प्राप्यते। यथा–

**कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ।**

**पूर्वपश्चिमगावेता वर्णवान्तरुपस्थितौ।।इति।।ब्रह्माण्डपराणु।।**

सुदूरपूर्वे कालिदासेन पूर्वसागरस्योल्लेखः कृतोऽस्ति।यथा–

**स सेनां महतीं कर्षन्पूर्वसागरगामिनीम्।**

**बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः।।रघु. ४/३२।।**

अयं पूर्वसागरः (बंगाल की खाडी) नाम्ना अद्यत्वे वयं जानीमः। अस्य तटे गङ्गायाः निम्नभूभागस्य समीपे निवसितानां सुह्म– बङ्गीय जनानामपि वर्णनं प्राप्यते । रघुवंशे–

**अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव।**

**आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम्।।**[२]

---

१. कुमारसम्भव –१/१,   २. रघुवंश – ४/३५

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान्।

निचखान जयस्तम्भान् गङ्गास्त्रोतोऽन्तरेषु च।।[1]

रघोः दिग्विजययात्रावर्णने रघु समीपे वङ्गीयनृपाणाम्– आत्मसमर्पणम्, पुनः रघुद्वारा तान् सिंहासने प्रतिष्ठापनस्योल्लेखो प्राप्यते। रघुवंशे–

**आपादपद्मप्रणताः कलमा इव ते रघुम्। फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः।।४/३७।।**

एतत् तटं सुविस्तृतहिन्दमहासागरपर्यन्तं विस्तृतमासीत्। हिन्दमहासागरः दक्षिणभारतीय प्रायद्वीपानां परिवेष्टनं कृत्वा शत्रोराक्रमणात् निर्भयता प्रदानं करोति। महोदधेः दक्षिणपूर्वी तथा सुदूरं दक्षिणतटतालवृक्षैः परिच्छिन्नमासीत्। रघुवंशे–

**प्राप तालीवनश्याममुपकण्ठं महोदधेः।।[2]**

महोदधेः दक्षिण–पश्चिमीतटे केरलीयाः जनाः निवसन्ति स्म। रघुवंशे–

**भयोत्सृष्टविभूषाणं तेन केरलयोषिताम्। अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः।।४/५४।।**

सम्पूर्णपश्चिमीतटं 'अपरान्त' कथ्यते स्म। यस्मिन् केरलोऽपि यम्मिलितः आसीत्। रघुवंशे–

**तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतै।।[3]**

उत्तर–पश्चिमे अर्थात् ईरान, वक्षुनद्याः घाट्यां क्रमशः श्मश्रुल –ईरानी – अश्वचालकानां तथा हूणानां निवास आसीत्। रघुवंशे–

**भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।**

**तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव।।**

**तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम्।**

**कपोलपाटलादेशि बभूव रघुचेष्टितम्।।४/६३,६८।।**

तेषां समीपे कम्बोजीयानां निवासः आसीत्।यथा–

**काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः।।रघु.४/६९।।**

---

१. रघुवंश –४/३६, २. – ४/३४, ३. –४/५३

उत्तर–पश्चिमे पामीपरस्य पर्वतग्रन्थितः पूर्वे विस्तृत संसारस्य सर्वोच्च पर्वतश्रृंखलाऽस्ति, यस्य कालिदासेन हिमाद्रि तथा हिमालय. नामभिरुल्लेखः कृतोऽस्ति। रघुवंशे–

**राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा।।**[१]

**हिमालयो नाम नगाधिराजः।। कु.१/१।।**

महाकवेः ग्रन्थेषु हिमच्छादिताः कैलाशः, गौरीशिखरः, गन्धमादनःमन्दरः, मेरुः, सुमेर्वादि पर्वतानां वर्णनं प्राप्यते येषां पर्वतानां भौगोलिकदृष्ट्या अति महत्त्व वर्तते। रघुवंशे कैलासस्योल्लेखः द्वितीयसर्गे–

**कैलासगौरं वृषमारुरुक्षोः पदार्पणानुग्रहपूतपृष्ठम्।।२/३५।।**

मेघदूते– **आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्त,**

**सम्पत्स्यन्ते नभसिभवतो राजहंसाः सहायाः।।**[२]

अर्थात्– मार्गभोज्यत्वेन मृणालाऽग्रखण्डानि गृहित्वा राजहंसा मानससरोवरे गमनोत्सुकाः सन्तः आकासे कैलासपर्वतपर्यन्तं त्वदीया सहचराः भविष्यन्ति।

अन्यच्च– **कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।।पू.मे.५८।।**

कुबेरशैलस्योल्लेखः कुमारसम्भवे–

**तावद्भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम्।।**[३]

एकपिङ्गलगिरिः –

**एकपिङ्गलगिरौ जगद्गुरुर्निवेश विशदाः शशिप्रभाः।।कुमा. ८/२४।।**

गौरीशिखरम्–

**प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्।।कु. ५/७।।**

अर्थात्– गुरुणा कृतानुमतिः गौर्याःसंज्ञया प्रथितं गौरीशिखरं प्रति गौरी तपस्यार्थं ययौ। अयं

---

१. रघुवंश –४/७९, २. मेघदूत– पू.मे. ११, ३. कुमारसम्भव –७/३०

शिखरः तदानीन्तनकाले भौगोलिकदृष्ट्या सर्वतः हिंसकप्राणिभिः रहित आसीत्।

## (२) भौगोलिकदृष्ट्या भारतीयपर्वतानां महत्वम्।

१. कैलासपर्वतः

कालिदासस्य वर्णनेन ज्ञायते यत् कैलासोऽयम् अनेकोऽन्नतशिखरान्वितः पर्वतमाला विद्यते। मेघदूते— **धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीववातै—**

**नानाचेष्टै र्जलद! ललितैर्निविशेस्तं नगेन्द्रम्।।**[१]

अर्थात्— यक्षः मेघं कथयति—वस्त्राणीव कल्पवृक्षपल्लवानि वायुभिः कम्पयन् नैकविधाभिः क्रीडाभिः कैलासं निर्विश। डॉ. वन्दना रस्तोगी कैलास पर्वत विषये स्वग्रन्थे लिखति—"**समुद्रतल से १५००० फीट तक की ऊचाई वाले कैलास के उत्तुङ्ग श्रृङ्ग नित्य हिमावृत रहते हैं।**"[२]

कैलासे स्वगणैः सह शिवो निवसति। अनेन तस्य अनेकरीत्या समृद्धेर्पुष्टि र्भवति। तुलसीदासकृत रामचरित मानसे—"**जबहिं संभु कैलासहिं आए। सुर सब निज निज लोक सिधाए। करहि बिबिध बिधि भोग बिलासा।** गनन्ह समेत **बसहि कैलासा**"—**बालकाण्ड पृ.९५** कैलासपर्वतः संभवतः तिब्बतीनां "स्वांग—रिन—पोचे" अस्ति, यः गङ्गोत्रीतः अग्रे मानसरोवरतः पञ्चविंशति( 25 mile) दूरे "नीति पासस्य" पूर्वे विद्यते। प्रसिद्ध गांग्रीश्रृङ्खलातः कैलासपर्वतः संस्लिष्टो विद्यते। कोऽपि भूगोलशास्त्रज्ञः एच. स्टेची. स्वग्रन्थे लिखति—"**कैलास सौन्दर्य की, जिन्हे मैंने देखा है, मात करदेता है, इसकी शालीनता असाधारण है, पर्वतों का राजा है।**"—कालिदास का भारत १ कैलासः शिव—पार्वत्योः वासस्थानं मन्यते स्म इति कालिदासस्य ग्रन्थेषु वर्णनं प्राप्यते। रघुवंशे—

**तत्राक्षोभ्यं वशोराशिं निवेश्यावरुरोहसः। पौलस्त्यतुलिस्यादेरादधान इव ह्रियम्।।४/८०।।**

कुमारसम्भवे—

**रावणध्वनितभीतया तया कण्ठसक्तमृदुबाहुबन्धनः।**

**एकपिङ्गलगिरौ जगद्गुरुर्निविवेश विशदाः शशिप्रभाः।।८/२४।।**

---

१. मेघदूत – पू.मे. ६२,     २. प्राचीन भारत में पर्यावरण चिन्तन।पृ.१८४

मेघदूते –

गत्वा चोर्ध्वंदशमुखभुजोच्छ्वासितप्रस्थसन्धैः,

कैलासस्य त्रिदशवनितादर्पण स्यातिथिः स्याः।

शृङ्गोच्छाये कुमुदविशदैर्यो वितत्य स्थितः रवं,

राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः।।[१]

अत्र कालिदासः कैलासस्य वर्णनं स्फटिकनिर्मितपर्वतरूपेण करोति, एषः पर्वतशिखरः निर्मलश्वेतहिमैराच्छन्नो विद्यते, तस्योपयोगं सुरसुन्दरी मुखावलोकने कुर्वन्ति। **श्री शेषराज रेग्मी पूर्व मेघस्य स्व टीकायां लिखति**–यत् महादेवस्य क्रीडार्थं देवैः क्रीडापर्वतानां रचना कृताऽस्ति। यथा शम्भुरहस्ये–

कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः।

क्रीडार्थं निर्मिताः शम्भोदेवैः क्रीडाद्रयोऽभवन्।।मेघ.पू.पृ. १२९।।

कविकालिदासः पुराणपरम्परायाः कथामपि संकेतयति। कैलासस्य पौराणिकनाम कुबेरशैलः, एकपिंगलगिरिरपि विद्यते। कुमारसम्भवे–

तावदद्भवस्यापि कुबेरशैलेतत्पूर्वपाणिग्रहणानुरूपम्।।[२]

'केप्टन ऊडको' मापनमनुसारेण नेपालस्य गौरीशिखरः गौरीशंकरः वा माउन्ट एवरेष्टः भवितुं नैव शक्नोति। आधुनिकमानचित्रेष्वपि गौरीशंकरः, तथा एवरेष्टः द्वौ पृथक् पृथक् दर्शयन्ति।

मेघदूतस्य व्याख्याकारः आचार्यः श्री शेषराज शर्मा रेग्मीः वर्णित मेघदूतस्य भौगोलिक विवरणे हिमालयस्योत्तरे अतिशयमनोहरः 'कैलास' नामकपर्वतोऽस्ति। यं पुराणे "देवभूमिः" कथितं वर्तते। अस्य दक्षिणस्या दिशौ "मानसरोवरः" वर्तते।(मेघदूतस्य भूमिकायाम्– पृ. ३६) अस्य सङ्केतः पूर्वमेघस्य एकादश(११) श्लोके वर्तते।

२. गन्धमादनपर्वतः

महाकविः कालिदासः गन्धमादनपर्वतं स्पष्टतः कैलास शृङ्खलायाः अन्तः समीपे

१. मेघदूत –पूर्वमेघ ६१, २.कुमारसम्भव –७/३०,

वा स्वीकरोति। "विक्रमोर्वशीयम्" नाटके चित्रलेखा वदति– "**नन्वेतत्परिवर्तितमिव**

**कैलाससिरवरं प्रियतमस्य ते भवनमुपगेतस्व।**"३/पृ.१३९

महाकवेरनुसारेण मन्दाकिनी जाह्नवी च द्वे गन्धमादनपर्वतस्य अन्तः सन् प्रवहतः। "विक्रमोर्वशीयम्" नाटके "**तत्र खलु मन्दाकिन्याः पुलिनेषु** गता **सिकतापर्वकेलीभिः क्रीडन्ती विद्याधरदारिकोदयवती** नाम तेन राजर्षिणा निध्यातेति उर्वशी।"[१]

अन्यच्च–

"**तत्र हंस धवलोत्तरच्छदजाह्नवीपुलिनचारुदर्शनम्।**" पृ.८७

कुमारसम्भवे– पार्वत्या सह विहाराऽवसरे पद्मभेदपिशुना गन्धमादनवनान्तमारुताः क्षणं सेवितवान् शिवः।यथा–

**पद्मबोधनिपुणाः सिषेविरे गन्धमादनवनान्तमारुता।।८/८६।।**

३. मन्दरपर्वतः

मन्दरपर्वतोऽपि कैलासगन्धमादनयोर्समीपेऽस्ति, कारणञ्च शिवः विवाहानन्तरं विहारार्थं मन्दरपर्वते गच्छति। कुमारसम्भवे–

**मन्दरस्य कटकेषु चावसत्पार्वतीवदनपद्मषट्पदः।।८/२३।।**

अन्यच्च–

**मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका।।८/५९।।**

मन्दरपर्वतस्य सन्दर्भे महाकविः महाभारतम् – अनुसरति। यथा महाभारतस्यानुसारेण मन्दरस्य स्थितिः कैलासगन्धमादनयोर्समीपेऽस्ति।–अनुशासनपर्व अध्याय–१९

४. मेरुपर्वतः

मेरुः अथवा सुमेरुः गढवालस्य रुद्रहिमालयोऽस्ति, यत्र गङ्गायाः स्त्रोतः विद्यते। रघुवंशे–

---

१. विक्रमोर्वशीयम् –४/पृ. १५०

मेरोरूपान्तेष्विव वर्तमानमन्योसमक्तमहस्त्रियामम्।।७/२४।।

कुमारसम्भवे–

- यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे।।१/२।।
- स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः।।१/१८।।

विवाहानन्तरं शिवः पार्वत्या सह मेरु– मन्दर– कैलास– गन्धमादनपर्वतेषु विहरति।यथा कुमारसम्भवे–

- मेरुमेत्य मरुदाशुवाहनः।।८/२२।।
- मन्दरस्य कटकेषु चावसत्।।८/२३।।
- एकपिङ्गलगिरौ (कैलासः)।।८/२४।।
- गन्धमादनवनं व्यगाहत।।८/२८।।

प्राचीनभारतीयग्रन्थकारैः स्वयं कालिदासेनाऽपि मेरु पर्वतं स्वर्णनिर्मितः किम्पुरुषः विद्याधरादि– अमानवीय देवयोनीविशेषानां वासस्थानरूपेण निर्दिष्टमस्ति। यथा कुमारसम्भवे–

- न्यस्ताक्षरा धातुरसेन यत्र, भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
  व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम्।।
- न दुर्वहोश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः।।
- यदृच्छया किम्पुरूषाङ्गनानाम्।।(१/७, ११, १४)

कालिदासोऽनेकस्थलेषु हिमालयस्य रोचकपूर्ण वर्णनं करोति। सान्द्रमेघाः पर्वतकटिभागे संचरणं कुर्वन् अधः स्व छायां प्रसारयति। यथा कुमारसम्भवे–

आमेखलं सञ्चरतां घनानां, छायामधःसानुगतां निषेव्य।

उद्वेजिता वृष्टिभिराश्रयन्ते, शृङ्गाणि यस्तातपवन्ति सिद्धाः।।[१]

शरदृतौ शुष्कक्षेत्रात् हंसाः गङ्गां प्रति गच्छन्ति। भूर्जपत्रेभ्यः मर्मरध्वनिः निःसरति वंशछिद्रेषु प्रविशन् वायुः मधुरवंशीध्वनिः निःसारयति। सा ध्वनिः गङ्गायाः आर्द्रशीतलवायुना सह पथिकानां पान्थपरिखेदं दूरं कुर्वन् हिमालयस्य किन्नरीणां सङ्गीतं मधुमयं करोति। यथा कुमारसम्भवे–

---

१. कुमारसम्भव –१/५,

य: पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन।

उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम्।।१/८।।

एवं प्रकारेण मेघदूतेऽपि वर्णनं प्राप्यते। यथा–

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः, संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**

**निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्, सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः।।**[१]

एतादृशैव भावयुक्तश्लोकः रघुवंशे–

**स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।**

**शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः।।**[२]

कस्तुरीमृगस्पृष्ट सुवासितशिलाखण्डान् नमेरुवृक्षाः स्वसान्द्रशीतलछायाभिः कृतार्थयन्ति। यथा कुमारसम्भवे–

**प्रस्थं हिमाद्रेर्मृगनाभिगन्धि।।कुमा. १/५४।।**

मेघदूते– **आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणाम्।।मे.पू.५२।।**

हिमालयः शाश्वत हिमाच्छन्नपर्वतोऽस्ति।अस्य भारतीय पर्वतश्रेण्याः वर्णनं कविना अनेक स्थलेषु सम्पूर्णाकथा, मेघदूतस्योत्तरार्धः, हिमालयेनैव सम्बद्धौ स्त। एवं प्रकारेण विक्रमोर्वशीयम् नाटकस्य चतुर्थोऽङ्कः, अभिज्ञानशाकुन्तलस्य सप्तमोऽङ्के, रघुवंशस्य प्रथम–द्वितीय–चतुर्थ सर्गेष्वपि हिमालयस्य सुन्दरं वर्णनं प्राप्यते।

## ५. अधित्यका (पठार) ।

'विन्ध्याचलम्' एका प्रसिद्धा पर्वतश्रेणी विद्यते या भारतवर्षम् उत्तर–दक्षिण विभागयोः विभजति। अत्रतः उत्तरापथ–दक्षिणापथ राजमार्गो प्रचलतः स्म। अद्य विन्ध्यशृङ्खलायां दक्षिणी ऋक्षः, पारियात्रः, विन्ध्यश्च त्रयाणां समावेशोऽस्ति। रघुवंशे यथा–

➢ **दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।।४/४९।।**

---

१. मेघदूत पूर्व. ५६, २.रघुवंश –२/१२

➢ विन्ध्यस्य संस्तम्भयिता महाद्रेर्निः शेषपीतोज्झितसिन्धुराजः।।[१]

विन्ध्यः सप्तकुल पर्वतेषु एको विद्यते। यथा मार्कण्डेयपुराणे–

**महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः।**

**विन्ध्यश्च पारियात्रश्च सप्तैते कुल पर्वताः।।५/७,१०–११।।**

श्री शेषराज शर्मा रेग्मी मेघदूतस्य भूमिकायां लिखति यत् इमं विन्ध्यपदं आर्यावर्त–दाक्षिणात्यदेशयोर्मध्ये वर्तते। मेघदूतस्य–पूर्वमेघेऽपि–संकेतो प्राप्यते। यथा–

**रेवां द्रक्ष्य स्युपल विषमे विन्ध्यपादे विशीर्णाम्।।**[२]

अधुना विन्ध्यपदं सतपूडा नाम्ना ज्ञायते, यत्र ताप्ती आदि नदीनामुद्गमोऽस्ति। कालिदासः दण्डकारण्यस्योल्लेखः चित्रकूटतःप्राक् करोति। प्रथमं रामः दण्डकारण्ये प्रविशति, तदनन्तरं चित्रकूटगीरौ। रघुवंशे–

**स सीतालक्ष्मणसखः सत्याद् गुरुमलोपयन्।**

**विवेश दण्डकारण्यं प्रत्येकं च सतां मनः।।१२/९।।**

अन्यच्च– **चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः।।रघु.१२/१५।।**

मेघदूतेऽपि सङ्केतो वर्तते। यथा–

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं।**

**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।।मेघ.पू.मे.१२।।**

परन्तु रामायणे दण्डकारण्यतः प्राक् चित्रकूटः समागच्छतीति उल्लेखो वर्तते। तत्र चित्रकूटे निवासं कृत्वा भगवान् श्री रामः दण्डकारण्ये प्रविशति। वाल्मीकि रामायणे–

**ततस्तौ पादचारेण गच्छन्तौ सह सीतया।**

**रम्यमासेदतुः शैलं चित्रकूटं मनोरमम्।।अयो.का.५६/१२।।**

दण्डकारण्यस्य विस्तारः विन्ध्यमेखलातः प्रारभ्य दक्षिणे गोदावर्य्याघाट्यां समाप्तिं गच्छति। एवं प्रकारेण दण्डकारण्यस्य स्थितिः विन्ध्यपर्वतस्य उत्तर–दक्षिणयोः तथा तस्य

१. रघुवंश – ६/६१,   २. मेघदूत पूर्व. –१९

उत्तेरचित्रकूटस्य स्थितिः सार्थकोऽस्ति। रघुवंशानुसारेण महेन्द्रपर्वतस्य स्थितिः कालिङ्गे वर्तते। रघुवंशे–

> **उत्कलादर्शितपथः कलिङ्गाभिमुखे ययौ।।४/३८।।**
> **स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्।।४/३९।।**

कलिङ्गराजः महेन्द्रस्य स्वामी आसीत्। महेन्द्र पर्वतस्य दक्षिणस्यां दिशौ समुद्रतटवर्तीभूमिः पूगवृक्षैः व्याप्ता आसीत्। यथा–

**ततो वेलातटेनैव फलवत्पूगमालिना।।रघु.४/४४।।**

हेमकोशाऽनुसारेण माल्यवान् प्रश्रवणगिरि वर्तते परन्तु भवभूतिः उभौ पृथक् पर्वतौ स्वीकरोति। उत्तररामचरिते–

**सोऽयं शैलः ककुभसुवभिमल्यिवान्नाम यस्मिन् –**

**नीलः स्निग्धः श्रयति शिखरंनूतनस्तोयवाहः।।उत्तर.१/३३।।**[३]

मैनाकपर्वतस्योल्लेखः कविः पौराणिकं काल्पनिकभिप्रायञ्च ध्यानं दत्वा करोति। भारतलङ्कयोर्मध्ये समुद्रे स्थितः एकः काल्पनिकपर्वतस्योल्लेखोऽरामायणे प्राप्यते। यथा–

**हिरण्यगर्भो मैनाको निशम्य लपणाम्भसः।**

**उत्पपात जलात् तूर्णं महाद्रुम लतावृतः।।वा.रा.सुन्द.१/१०१।।**

तुलसीदासकृत रामचरितमानसे–

**जलनिधि रघुपति दूत विचारी। तैं मैनाक हो हि श्रमहारी।।**[१]

अतः कालिदासस्यभाषया अस्य पर्वतस्य पौराणिक पारम्परिकञ्च वर्णनं स्वतः सिध्यति। यथा कुमारसम्भवे–

**असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसरव्यम्।।**[२]

अस्मात् कारणात् 'नन्दलालदेका' अपि भारत लङ्कयोर्मध्यसमुद्रे स्थित पर्वर्तसम्बन्धे स्वीकारात्मिका वाणी वदति। अस्याऽपि पुष्टिर्भवति।

१. रामचरितमानस –सुन्दरकाण्ड १,      २. कुमारसम्भव –१/२०

- माल –

मल्लिनाथः इमं पर्वतस्येवोन्नतं स्थलमिव लिखति। परन्तु केचन विद्वांसः इमं मध्यप्रदेशे रत्नपुरस्योत्तरभागे अवस्थितः "माल्वा" देशः कथयन्ति। यथा मेघदूते–

**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुध्यमालम्।।मे.पू.१६।।**

–श्री शेषराज शर्मा 'रेग्मी' मेघदूतस्य भूमिकायाम्।।पृ.३६।।

- आम्रकूटः–

'विल्सन' इमं पर्वतं 'अमरकण्टक' नाम पर्वतः कथितवान् दस्ति। अयं नर्मदा नद्याः उद्गम स्थलोऽस्ति। यथा मेघदूते–

**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।।मे.पू.१७।।**

–श्री शेषराज शर्मा 'रेग्मी' मेघदूतस्य भूमिकायम्।।पृ.३५।।

## ६.कालिदासग्रन्थेषु नदीनां वर्णनम् ।

भारतवर्षस्य क्षेत्रे याः नद्यः प्रवहन्ति तासाम् उद्गमस्थानं हिमालयः तथा तन्निकटस्थ पर्वताः सन्ति। एतासु काचन् नद्य भारतवर्षस्य मध्यवर्ती अधित्यकातः निष्सृत्य उत्तरस्यां दिशौ वहन्ति। हिमालयतः याः नद्यः निःसरन्ति तासां नदीनां जलं तुषासंधातैः आगच्छति। एवं प्रकारेण एताः नदीः वर्षायां निर्भराः नैव सन्ति। हिमाद्रेः हिमैः वर्षायाः जलैश्च परिपूर्णाः पर्वतेषु गर्जन्ती दरीमुखै र्निःसृत्य शिला खण्डान त्रोटयन्ती प्रवहन्ति। यथा कुमारसम्भवे–

**गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश।।कुमा.२/२६।।**

**व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु।।६/५१।।**

भारतस्य विशिष्टनदीनां प्रवाहान् कालिदासः त्रिधा विभजते।–

१. सिन्धु

२.गङ्गा तस्य सहायिका नद्यश्च।

१. सिन्धोरुल्लेखो मेघदूते वर्तते। पूर्वमेघे यक्षः मेघं प्रार्थयते। हे मेघ सा निर्विन्ध्या(सिन्धुः) नदी त्वद्वियोगात् स्तोकजलेन कृशशरीरा तटोत्पन्न वृक्षाणां शुष्कपत्रैः पीतवर्णा च सती ते

सौभाग्यं व्यञ्जयति। अतः सा यथा कृशत्वं मुञ्चति तथा त्वया करणीयम्। यथा–

**वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः**

**पाण्डुच्छायातटरुहतरु भ्रंशिभिजीर्णपर्णैः।**

**सौभाग्यं ते सुभग विरहवस्थया व्यञ्जयन्ती**

**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः।।**[१]

रघुवंशे–

**पिबत्यसौ पाचयते च सिन्धूः।।१३/९।।**

२. **गङ्गा तस्य सहायिका नद्यश्च** :– गङ्गायाः अन्य नाम यथा जह्नुकन्या, जाह्नवी, भागरथ्यादीनामपि कालिदासग्रन्थेषूल्लेखो प्राप्यते। हिमालये गङ्गोत्रीतः निःसृत्य ब्रह्मपुत्रेण सह पुर्वसागरे पतति। रघोः दिग्विजययात्राप्रसङ्गे मार्गे गङ्गाशीकरिणोवायुः तं रघुं सेवितवान्। रघुवंशे–

**गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे।।**[२]

कुमारसम्भवे–

- **तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः।।१/३०।।**
- **गङ्गाप्रवाहोक्षितदेवदारु।।१/५४।।**

मेघदूते–गङ्गायाः वर्णनम्–यथा–

**तस्माद् गच्छेरनुकनरवलं शैलराजावतीर्णा,**

**जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।**

**गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः,**

**शंभो केशग्रहणमकरोदिन्दु लग्नोर्मिहस्ता।।पू.मे.५०।।**

- **यमुना।**

बन्दरपुच्छपर्वतस्येकभागः कलिन्द–गिरितः निःसरति। अस्याऽपर नाम कलिन्दकन्यापि वर्तते।

एषा एका उत्तरभारतस्य नदी वर्तते। यमुना प्रयागस्य समीपे गङ्गया सह मिलति। द्वयोः सङ्गमयोः शास्त्रे

अतिमहत्वं वर्तते। रघुवंशे यथा–

**कालिन्दकन्या मथुरां गतापि गाङ्गोर्मिसंसक्तजलेव भाति।।६/४८।।**

---

१. मेघदूत – पूर्वमेघ २९, २. रघुवंश – ४/७३

निम्नाङि्कतैश्चतुर्भिः श्लोकैः प्रयागे गङ्गायमुना सङ्गमं वर्णयति–

**क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा।**
**अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव।।[१]**

**क्वचित्खगानां प्रियमानसानां कादम्ब संसर्गवतीव पङि्क्तः**
**अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव।।१३/५५।।**

अयं श्लोकः सङ्गमस्य महत्त्वं तत्रस्नानफलञ्च प्रदर्शयति–गङ्गा– यमुनयो सङ्गमे स्नानात् सुद्धात्मनां पुंसा तत्वज्ञानेन विनाऽपि प्रारब्धशरीरत्यागानन्तरं पुनः शरीरयोगो नास्तीति, अन्यत्र ज्ञान्यादेवमुक्तिः। अत्र तु स्नानादेव मुक्तिः। यथा–

**समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात्।**
**तत्त्वावबोधेन विनाऽपि भूयस्तनुत्यजां नास्ति शरीरबन्धः।। रघु. १३/५८।।**

- सरयू नद्याः महत्त्वं रघुवंशे–

**सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियूक्ता।**
**दूरे वसन्तं शिशिरानिलैर्मी तरङ्गहस्तैरुपगूहतीव।।१३/६३।।**

श्री रामः स्वमुखेनास्य महत्त्वं सीतां श्रावयन् कथयति– एषा नदी मदीया जननी कौसल्येव राज्ञा दशरथेन वियूक्ता सरयूर्दूरे वसन्तम्, मां पुत्रभूतशिशिरानिलैस्तरङ्गैव हस्तैरालिङ्गतीव।

कालिदासस्य सप्तग्रन्थेषु यदि वयं सूक्ष्मावलोकनं कुर्मः तदा भौगोलिकदृष्ट्या ऋतुसंहारम्, मेघदूतम् द्वे काव्ये अतिमहत्त्वं धरतः। अत्रप्रथमं मेघदूते वर्णितनदीनां विवरणं समासेन दीयते। (मेघदूतस्यभूमिकातः श्री शेषराज शर्मा रेग्मी)

**क. रेवा**– एषा विन्ध्यपर्वतस्य पूर्वदिशायामवस्थितः मेकलपर्वतात् निःसरति। इमां "नर्मदा" अपि कथयन्ति, इयम् ८०० कोस दीर्घा वर्तते।

**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम्।।मेघ. पू.मे.१९।।**

**ख. वेत्रवती**– एषा दशार्णदेशे प्रवहति। अस्या– आधुनिक नाम "बेतवा" वर्तते।इयं विन्ध्यपर्वतस्योत्तरतः निःसृत्य मालवदेशं तथा प्रयागस्य नैत्रर्ऋत्यभागं स्वजलेनाप्लावित्वा यमुनया मिलति। यथा–

---

१. रघुवंश –१३/५४,

**सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।।**[1]

ग. **निर्बिन्ध्या–** एषा विन्ध्यपर्वतात् निःसरसि ।यथा–

**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य।।मे.पू.२८।।**

घ. **सिप्रा(शिप्रा)–** एषा नदी उज्जयिनां प्रवहति। यथा–

**शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।।मे.पू.३१।।**

ङ. **गन्धवती–** एषा नदी मालवदेशे प्रवहति। यथा–

**धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या।।मे.पू. ३३।।**

च. **गम्भीरा–** एषाऽपि नदी मालवदेशे प्रवहति। यथा–

**गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने।। मे.पू.४०।।**

छ. **चर्मण्वती–** एषा नदी विन्ध्यपर्वतस्य वायव्य कोणतः निःसरति। अस्य–आधुनिक नाम "चम्बल" वर्तते।

ज. **सरस्वती–** प्रसिद्धैषा नदी हिमालयतः निःसृता वर्तते, या कुरुक्षेत्रस्य वायव्यकोणे प्रवहति। अद्यत्वे– अदृशास्ति।

**कृत्वा तासामभिगममपां सौम्य! सारस्वतीनाम्।।**[2]

ऋतुसंहारस्य ऋतुवर्णनं जलवायविक –वानस्पतिक–जीवशास्त्रीय यथातथ्यता परिपूर्णोऽस्ति। कालिदासस्येयं कृतिः भारतीय ऋतु चक्रस्य–अद्वितीय विशेषतायाः ज्ञापयत्री संस्कृतसाहित्यस्यानन्य कृतिरस्ति। अस्मिन् काव्ये वर्णिताः षडर्तवः भारतीय सम्वत्सरैव भवन्ति। प्रत्येक ऋतूनां स्व पृथक्–पृथक् रूपवर्णौ स्तः। भारतं विहाय एतादृशी ऋतुषु विविधता अन्यत्र दुर्लभोऽस्ति।

शरद–हेमन्त–शिशिरर्तुषु शालि–कलम–इक्षुभिः परिपूर्णाः ग्राम–सीमान्त–प्रदेशानां वर्णनं भारतस्य कृषिप्रधानतां संसूचयन्ति। ऋतुसंहारे–

**आपक्वशालिरुचिरानतगात्रयष्टिः।।ऋतु. ३/१।।**

---

१. मेघदूत – पूर्वमेघ २४, २. –पूर्वमेघ ४९,

कविना–आत्मन–प्रकृत्योर्मध्ये घनिष्ठता स्थापनं कृतमस्ति। प्रकृतिः कवेरग्रे स्वाऽमोदरहस्यौ सविस्तरं प्रस्तौति। कवेः प्रकृतिवर्णने मानवभावुकता वर्तते। डॉ. कीथ ऋतुवर्णनैः प्रभावितो भुत्वा लिखति–"**ऋतुएँ**

**निःसन्देह भारत की हैं, विशेषतः हिन्दुस्तान की दृश्य उस खुले जीवन के हैं जो उस काल के**

**विद्वान ब्राह्मण बिताते थे और जो वनों के हैं। शाकुन्तल में इन दृश्यों का प्रभूत वर्णन है। कवि अंग्ररेज कवि टौमसन की भांति कठिन सर्दी के वर्णन के लिए शीत कटिबन्ध अथवा ग्रीष्म की भीषणता के लिए उष्ण कटिबन्ध में नहीं घुमता बल्कि इस सम्बन्ध में केवल अपनी देशी ऋतुओं के दृश्य खींचता है।"**[1]

कवे वर्णनेन, भारतस्य जलवायुः तथा वर्षादिष्वपि प्रभावो भवति। कालिदासानुसारेण षडर्तूनां क्रमः निम्नप्रकारेणास्ति।–

१. निदाघकालः– June-July

२. वर्षाकालः– August-September

३. शरद्कालः–October-November

४.हेमन्तकालः–December-January

५. शिशिरः कालः–Febuary-March

६. वसन्तः कालः–April-May

- निदाघकालस्य समासेन वर्णनम्–

साम्प्रतं सूर्यो भृशं तपति, चन्द्रस्य चन्द्रिका अतीव सुखमयी अनुभूयते। जनाः दीर्घकालपर्यन्तं स्नानं कुर्वन्ति, तेन सञ्चितस्यापि जलस्य भण्डारः अपचीयते। अस्मिन् ऋतौ सायंकालो रमणीय आभाति। यथा ऋतुसंहारस्यादिम श्लोके महाकविः ग्रीष्मर्तो वर्णनमुपस्थापयति। यथा–

**प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसंचयः।**
**दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये।।**[2]

- वर्षाकालस्य वर्णनं यथा ऋतुसंहारे–

**सशीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनिशब्दमर्दलः।**
**समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये।।२/१।।**

---

१. कालिदास का भारत–१ पृ.५७,   २. ऋतुसंहार – १/१

अर्थात्– ऋतुरयं कामिजनानां प्रियतमो भवति। येन प्रकारेण राज्ञां कुञ्जरा भवन्ति, तेनैव प्रकारेण राज्ञौ वर्षर्तोः मेघा एव सीकराम्भः कणाञ्चिता हस्तिनः सन्ति। राज्ञोध्वजपताका इव विद्योततेविद्युत। घनध्वनिस्तथैवाति चण्डो भवति यथा राज्ञो भेरीध्वनिर्भवति ।।एतादृशः वर्षर्तुः सम्प्राप्तः।।

- शरद्कालस्य वर्णनम्–ऋतुसंहारे–

**काशांशुका विकचपद्ममनोज्ञवक्त्रा,**

**सोन्मादहंसरवनूपुरनादरम्या।**

**आपक्वशालिरुचिरानतगात्रयष्टिः,**

**प्राप्ता शरन्नववधूरिव रुपरम्या।।३/१।।**

अर्थात्– महाकविः कालिदासः शरदृतोः नववधोः रूपेण वर्णनं करोति। शरद्वधूरियंरूपरम्या वर्तते। काशविकास एवास्याःवस्त्रम्, विकसतानि कमलान्मेवास्याः शरद्वधोः मनोज्ञं मुखमण्डलम्, उत्कटहंसस्वनमेवास्याः नूपुरखः तस्याः आपक्वशालिरेव रुचिरं कृशं गात्रं तथा विधेयं शरद्वधूरतीव रमणीया वर्तते।

- हेमन्तकालस्य वर्णनम्– ऋतुसंहारे–

**नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः।**

**विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम्।।**[१]

अर्थात्– अस्मिनृत्तौ गोधूमेत्यादिकानि सस्यानि अंकुरितानि भवन्ति, अतएवास्य ऋतोः रम्यता जायते। शालयोऽपि परिपक्वाः संजाताः, तुषारपतनेन कमलपुष्पाणि सरस्सु नावलोक्यन्ते एतादृशो हेमन्तकालः सम्प्राप्तः।

- शिशिरकालस्य वर्णनम्–ऋतुसंहारे–

**प्ररूढशालीक्षुचयावृताक्षितिं,**

**क्वचित्स्थितक्रौञ्चनिनादराजितम्।**

**प्रकामकामं प्रमदाजनप्रियं,**

**वरोरु कालं शिशिराह्वयं शृणु।।५/१।।**

अर्थात्– अस्मिन् ऋतौ सर्वत्र पक्वः शालिसमूह एवावलोक्यते। स्थाने– स्थाने उपविष्टाः क्रौञ्चपक्षिणः कलरवं कुर्वन्ति। अत एवाऽयं प्रमदाजनेभ्योऽतिप्रियः कालः समागतः।

१. ऋतुसंहार –४/१,

- वसन्तकालस्य वर्णनम् – ऋतुसंहारे–

**प्रफुल्लचूताङ्कुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः।**

**मनांसि भेत्तुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये।।**[१]

अर्थात्– अस्मिन् श्लोके कविः वसन्तर्तोः वर्णनं योद्धा रूपेण करोति। अस्य योद्धुः चूताङ्कुरा एव बाणाः, भ्रमराणां पंक्तिरेव प्रत्यञ्चा, कामिनां मनांसि एव लक्ष्यम्।

अन्यच्च–

**द्रुमाः सपुष्पाः सलिलं सपद्मं,**

**स्त्रियः सकामाः पवनः सुगन्धिः।**

**सुखाः प्रदोषा दिवसाश्च रम्याः,**

**सर्वं प्रिये चारुतरं वसन्ते।।६/२।।**

**निष्कर्षः** – एवं प्रकारेण उपर्युक्त भौगोलिकवर्णनेन ज्ञायते यत् महाकवेः कालिदासस्य ग्रन्थेषु भौगोलिक विषयस्याऽपारभण्डारोऽस्तीति।

---

१. ऋतुसंहार – ६/१

## ६. कालिदासकृतीनां पर्यावरणदृष्ट्या वैशिष्ट्यम्।

अस्मिन् कालिदासस्य कृतीनां वैशिष्ट्यवर्णनप्रसङ्गे भौगोलिकदृष्ट्या ग्रन्थानां वैशिष्ट्यं सम्यग् परिशीलनानन्तरमवसरप्राप्तोऽहं यथामत्याः तेषां ग्रन्थानां पर्यावरणदृष्ट्या वैशिष्ट्यं प्रस्तौमि। युगद्रष्टा कविकुलगुरोः ग्रन्थेषु नानारूपाप्रकृतिः निर्मली वर्णिता दृश्यते। पर्यावरण संरक्षणदृष्ट्या कविः सर्वत्र मानवरूपां प्रकृतिं वर्णयति। तस्य पर्यावरणवर्णने यादृश्यः सजीवता, रमणीयता, भव्यता च दृष्टिगोचरा भवति तादृश्यः तु अन्यत्र दुर्लभा एव। अस्य यादृशी सूक्ष्मादृष्टिः वनेषु, पर्वतेषु, पल्लवेषु, पादपेषु, नदीषु, लताषु, ऋतुप्रभृतिषु च दृश्यते तादृशी क्वचिदपि नावलोक्यते।

### ❖ रघुवंशमहाकाव्यस्य पर्यावरणदृष्ट्या वैशिष्ट्यम्।

रघुवंशमहाकाव्यं कालिदासस्य सर्वश्रेष्ठा रचना मन्यते। महाकाव्येऽस्मिन्नेकोनविंशतिसर्गाः विद्यन्ते, यत्र दिलीपादारभ्याग्निवर्णपर्यन्तेक्ष्वाकुवंशीयानां चरतानि वर्णितानि सन्ति। महाकाव्यस्यावश्यकांगतया पर्यावरणवर्णनमपि रघुवंशे बहुत्र दृश्यते, परन्तु मयाऽत्र संक्षेपेण प्रस्तूयते।कविकुलगुरोः काव्येषु नानारूपाप्रकृतिः पर्यावरणं निर्मलीकुर्वाणा वर्णिता दृश्यते। पर्यावरणसंरक्षणदृष्ट्या कविः सर्वत्र मानवरूपां प्रकृतिः वर्णयति। यथा–

**विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य।**

**उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः।।**[१]

अर्थात् – परित्यक्तसेवकवर्गस्यापि वरुणतुल्यप्रभावस्य तस्य राज्ञो दिलीपस्य उभयपार्श्वस्थितेषु वृक्षेषु स्थितानां पक्षिणां कूजितं वन्दिजनभाषितजयशब्द इवाभवत्।

वृक्षाश्रिता बातलताः पौरकन्यामिव राज्ञे पुष्पाण्यवाकिरन्। यथा–

**मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम्।**

**अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः।।**[२]

अर्थात्– वह्नितुल्यदीप्तिमन्तं राजानं दिलीपमागतं दृष्ट्वा बाललताः समीपे वर्तमानस्य दिलीपस्योपरि पुष्पवृष्टिम् – अकुर्वन्, यथा पौरकन्याः मंगलार्थं लाजवर्षणं कुर्वन्ति।

१. रघुवंश –२/९, २. – २/१०

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

देवदारुः वृषभध्वजेन पुत्रीकृतः। तस्य त्वक् केनाऽपि वन्यद्विपेन कण्डूयमानेन उन्मथिता तदा पार्वती कुद्धाऽभवत् । तद्यथा–

**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।**

**यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः।।**[१]

अन्यच्च– **कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य।**

**अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः।।२/३७।।**

जलसंरक्षणस्योदाहरम्–

**निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम्।**

**तान्युञ्छषष्ठाङ्किकतसैकतानि शिवानि वस्तीर्थजलानि कच्चित्।।५८।।**

अत्र रघुः गुरुदक्षिणाऽर्थी वरतन्तुशिष्यं ऋषिसेवितजलानांनिरूपद्रवंपृच्छन् कथयति– येषां जलानि भवदीया व्रतसम्बन्धी स्नानादिकाक्रियाः निष्पादयन्ति, येषाजलेभ्यश्च भवन्तः पितृणां तर्पणाञ्जलीन् निष्पादयन्ति, तेषां वस्तीर्थानां जलानि प्रदूषणरहितानि सन्ति किम् ? अस्मिन् श्लोके जलविषयक पर्यावरणचिन्तनमस्ति। –द्वादस सर्गे श्री रामः पुनर्भरतागमनशङ्कया चित्रकूट स्थलीं त्यजन्नासीत्, तदा तत्रस्थाः मृगाः रामस्यदर्शनार्थमुत्कण्ठितारासन्। तद्यथा–

**रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः।**

**अशंक्योत्सुकसारंगा चित्रकूटस्थलीं जहौ।।**[२]

सितायाः करुणक्रन्दनंनिशम्य वृक्षाः जीव–जन्तवोऽपि समदुःखमावहन्ति। यथा–

**नृत्यं मयूराःकुसुमानि वृक्षाः दर्भानुपात्तान्निजहुर्हरिण्यः।**

**तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि।।रघु.१४/६३।।**

## ❖ कुमारसंम्भवस्यकाव्यस्य पर्यावरणदृष्ट्या वैशिष्ट्यम् ।

भारतीय पाश्चात्योभयदृष्ट्या कालिदासः संस्कृतसाहित्यस्य सर्वश्रेष्ठः कलाकारः

१. रघुवंश –२/३६, २. – १२/२४

सर्वमान्यः कविश्च मन्यते। असौ महाकविः कविकुलगुरु– कविकुलशिरोमणीत्यादिनाम्ना यत्र तत्र भारतीयसाहित्यसंसारे प्रशस्यते विद्वद्भिः समालोचकैः। विश्वविख्यातस्यास्यैव श्रेष्ठकलाकारस्य प्रशस्तं महाकव्यमस्तिकुमारसम्भवंनाम।

भाषासौष्ठवादिविविधवैशिष्ट्यातिरिक्तमस्य महाकाव्यस्य पर्यावरणदृष्ट्याऽपि न्यूनं वैशिष्ट्यं नास्ति। ग्रन्थेऽस्मिन् ये पर्यावरणवर्णनप्रकाराः संलक्ष्यन्ते तेषु प्रमुखाः सन्त्यालंम्बनरुपकः, उद्दीपनरूपकः, अलंकारविधानरुपकः,नित्युपदेशात्मकश्च।तत्रालंबनरुपकं, प्रकृतिचित्रणं, महाकाव्यस्यास्य प्रथमसर्गे,तृतीयसर्गे, अष्टमसर्गे, चास्माभिः,सम्यगवलोक्यते।कविःप्रथमसर्गे पर्वतराजस्य वर्णनं प्रस्तुवन्कथयति। यथा–

**अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।**

**पुर्वापरौ तोयनिधि वगाह्य, स्थितः पृथिव्याः इव मानदण्डः।।**[१]

अस्मिन् श्लोके उत्तरस्यां दिशि हिमवतो देवभूमित्वं सूच्यते। देवतात्मा इति न मात्रं स्थावरात्मा, इदं तु वक्ष्यमाण चेतनकृत्य विवाहादि घटनार्थम्। पर्यावरणसन्तूलने हिमालयः सर्वश्रेष्ठो वर्तते, भौगोलिकदृष्ट्या– अतीव महत्त्वं वर्तते।

हिमालये– असीम प्रकृतिसम्पदा निगूढा वर्तते, तां( सम्पदां ) सर्वेभ्यो मुक्तहस्तेन वितरति। अत्रस्थ वनसम्पदः जनान् दीव्यौषधीं प्रदाय आरोग्यं जीवनदानं च ददाति। यत्र औषधयः रजन्यां वनेचराणाम्– अतैलपूरा सुरतप्रदीपाः भवन्ति। यथा–

**वनेचराणां वनितासखानां, दरीगृहोत्सङ्गनिषक्तभासः।**

**भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः।।**[२]

- हिमालस्य अनेकपर्वतशिलासु रत्नखनिजादि विविधौषधीनां बहुलता वर्तते। तद्यथा–

**गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्दधानाः।**

**मनः शिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु।।**[३]

अत्र पर्यावरणसम्पदा प्रचुरमात्रायां दरीदृश्यते।

हिमालयः वनवासीनां जीवनाऽऽवश्यकवस्तूनां पूर्त्या सह, पर्यावरण संरक्षेणऽपि योगदानं

---

१. कुमारसम्भव – १/१, २ – १/१०, ३. – १/५५

ददाति। अस्माकं कृते प्राणवायोः( ऑक्सीजन ) भाण्डागारं हिमालयो वर्तते। भूगर्भीय जलसञ्चयकर्ता वन्यसंसाधनप्रदाता, तथा वन्यजीवानां निवासस्थानमपि हिमालयोऽस्ति। अत्र पृथक्– पृथक् वनस्पतयः प्राप्यन्ते, ये विशेषतः रोगनिवारिकाः भवन्ति। अत्राऽरण्ये सघनाः, उन्नता, प्रचुरमात्रायाम् वृक्षासन्ति, ये अस्मान् जीवनार्थं प्राणवायुः ददाति। एवं प्रकारेण हिमालयस्य वनानि भारतीय पर्यावरणसंरक्षणे सन्तूलने च सहायकभूता सन्ति।

अद्य मानवानां परस्परसम्बन्धेष्वविश्वासो दृश्यते, किन्तु जन्तूनां परस्परसम्बन्धेषु विश्वासमेवाधारम्। तत्र भवान् श्लोकेऽस्मिन् प्रत्यक्षी करोतु यत् द्विरेफे भृङ्ग्या सह, कृष्णसारो मृग्या सह परस्परं विश्वासपूर्वकं नायक – नायिका इव व्यवहरन्ति। तद्यथा–

**मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।**

**शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।।**[१]

पर्यावरणसंरक्षणे मूख्य भूमिका भजनशीलां भूमि– जल– वाय्वाकाश– वनस्पति जीवजन्त्वादीनां वर्णनं महाकाव्यस्य प्रत्येकसर्गे– अनेकरूपेण दृश्यते। परन्तु मयाऽत्र संशोधन विषयस्य दीर्घकायभयात् संक्षेपेण वर्णनं कृतवान्नस्मीति।

### ❖ मेघदूतखण्डकाव्यस्य पर्यावरणदृष्ट्या वैशिष्ट्यम्।

"मेघदूतम्" महाकवेः कालिदासस्य सुप्रसिद्धं प्रबन्धात्मकं गीतिकाव्यमस्ति। इदं हि साहित्यमर्मज्ञैः समालोचकैः खण्डकाव्यत्वेनाऽपि स्वीकृतमस्ति। प्रकृतिप्रेमी कालिदासः सर्वत्रैवान्तजगत्सौन्दर्यबाह्यजगत्यप्यवलोकयन् केवलमुभयोः समन्वयमेव नापितु तादात्म्यमपि स्थापयितुमिच्छति। महाकवेःग्रन्थेषु पर्यावरणस्य स्वाभाविकं रुपंदृश्यते। 'मेघदूतम्' पर्यावरणदृष्ट्या सर्वोपरि वर्तते। कारणञ्चात्र कथानकः गौणः वर्तते, सर्वंखलु अस्मिन् खण्डकाव्ये सर्वत्र पर्यावरणस्य चित्रं दृश्यते।

मेघदूतस्य खण्डकाव्यस्य प्रारम्भो रामगिर्याश्रमे शापविमुक्तये यक्षनिवासेन भवति। प्रकृतिः सदा सर्वदा शरणदात्रि परोपकारिणी च आसीदधुनाऽपि–अस्त्यैव। अतो यक्षः मनसि विस्वासं निधाय नमेरुवृक्षाणां स्निग्धछायातले प्रकृत्याक्रोडे शरणं गतः। तद्यथा–

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु,**

**स्निग्धछायातरुषु वसतिं रामगिर्याश्रमेषु ।।**[२]

---

१. कुमारसम्भव – ३/३६,    २. मेघदूत – पूर्वमेघ १

मेघदूते सर्वत्र प्रकृतिवर्णनं समुपलभ्यते पूर्वमेघे तु भौगोलिक वर्णनेन कविः पर्यावरणसंरक्षणे प्रयत्नशीलो दृश्यते। यथा–

**धूमोज्योतिः सलिलमरुतां सन्निपातःक्व मेघः ।।[१]**

इति पंत्त्या मेघस्य परिचयं ददाति । मेघदूते कालिदासो लोककल्याणहेतवे – अर्थिभूयपर्यावरणसंरक्षणार्थं तोयं ययाचे।यथा_

**जातं वंशे भुवनविदिते पुष्करावर्तकानां,**

**जानामि त्वां प्रकृतिपुरुषं कामरूपंमघोनः ।**

**तेनार्थित्वं त्वयिविधिवशाद् दूरबन्धुर्गतोहं,**

**याच्ञामोघा वरमधिगुणे नाधमे लब्धकामा ।। मे. पू. /६ ।।**

महाकविः कालिदासः अनेकप्रकारकसुगन्धिनामुल्लेखः करोति। यक्षःमेघं कथयति मालवदेशे तथावर्षणं कुरु यथा भूमिः सुगन्धितं भवेत्। तद्यथा–

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः,**

**प्रीतिस्निग्धै जनपदवधू लोचनैः पीयमानः।**

**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्यमालं,**

**किञ्चित् पश्चात् व्रजलघुगतिर्भूय एवोत्तरेण।।[२]**

अस्माकं देशः कृषिप्रधानो विद्यते। यदि वर्षा समयानुसारेण न स्यात् तदा पाकः सम्यग् न भवति। पृथिव्यां निवासिनः सर्वेषां प्राणीनां कल्याणाय प्रथमं तावत् जलस्यावश्यकता भवति, एतदर्थं कालिदासः यक्षमुखेन मेघं कथयति हलकर्षणं स्यात् तथा वर्षणं कुरु। कालिदासः जानाति यद् पर्यावरणस्य सुरक्षा जले निहितोऽस्ति।

महाकविकालिदासस्य प्रकृतिवर्णनस्यानेकविधवैशिष्ट्यानि दृश्यन्ते तेषु मेघदूतविषये मानवीकरणरूपात्मके प्रकृतिचित्रणे सर्वप्रथमं वयमिदमेव सुस्पष्टं पश्यामो यत्तेन मेधाय मानवोचितदौत्यकर्मसमर्पणकृतमिति। मानवीकरणरूपेण मेघदूतीयान्यानि प्रशस्तानि प्रकृतिचित्रणोदाहरणानिसन्ति।तद्यथा–

---

१. मेघदूत पूर्वमेघ –५, २. – पूर्वमेघ ६,

गम्भीरायाः पयसि सरितश्चेतसीव प्रपन्ने,

छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।

तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या–

न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि।।मे.पू. ४०।।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां,

वामश्चायं नदति मधुर चातकस्ते सगन्धः।

गर्भाधानात्क्षणपरिचयान्नूनमाबद्धमालाः,

सेविष्यन्तेनयनसुभगं खे भवन्तं बलाकाः।।पू.मे. ९।।

अनेन प्रकारेण कविः पर्यावरणस्य संरक्षणार्थं अनेकाविधयः अस्मान् येक्षमाध्यमेन शिक्षयति, येन वयं पर्यावरणसंरक्षणे–संवर्द्धने च जागुरुकाः श्यामेति।।

## ❖ ऋतुसंहारगीतिकाव्यस्य पर्यावरणदृष्ट्या वैशिष्ट्यम्।

ऋतुसंहारगीतिकाव्यं कालिदासस्य प्रथमा काव्यकृतिरस्ति। तस्य काव्यकलायाः समारम्भोऽस्मादेव ऋतुवर्णनपरकलघुकाव्यादभुदिति विदुषां मतम्। अत्र षट्सु सर्गेषु प्रति सर्गमेकैकेषामृतूनां वर्णनं दृश्यते। षडर्तवः पर्यावरणस्य मुख्याः कारकाः सन्ति। तथाहि ग्रीष्मे प्रखरतेजोभिर्दिवसैः पीडितो युवलोकः रात्रिष्वेव निवृत्तिं लभते। यदा सुन्दरी सुन्दरमुखच्छविभिर्निर्जित लक्ष्मीकश्चन्द्रोऽपि ताभ्योद्रुह्यति, प्रोषिताश्च तरुणाः स्वतरुणी विरहं सोढुं न पारयन्ति। प्रावृषि तावन्मेघाः शनैः शनैराकाशं निबिडमाच्छादयन्ति। अधोऽधो विलम्विनश्च ते गिरिभूमिश्चुम्बितुकामा इवालोक्यन्ते। इदानीं च काले कामिषु कामः कृतजीवनरससेक इव जलदैर्भवति। शरत्संयुक्तानां कामिनीनां तु कोप्यद्भूतः सुखसम्भवकालो भवति । वियुक्तानां तु हिमाहतानां प्रियंगुलतानामिव परितापकैव भवति। अथ क्रमेण सर्वान्ते वर्णिते वसन्ते पञ्चशरशरायमाणाश्चूततरुमञ्जर्यो युवतिजनहृदयानि विध्यन्ति। कालिदासस्य ऋतुसंहारकाव्ये ये प्रकृति वर्णनप्रकाराः समुपलभ्यन्ते तेषु प्रमुखा–आलम्बनोद्दीपनालंकार विधान मानवी करण–रूपात्मकप्रकाराः सन्ति। ऋतुसंहारस्य प्रथमसर्गे ग्रीष्म ऋतुमुपवर्णयन्कविः सामायिकप्रभावं प्रदर्शयति। तद्यथा–

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये।।ऋतु. १/१।।

वनप्रान्ते कोमलतृणाङ्कुरान् चरन्तः चञ्चलनेत्राश्चमृगाः वानराः, भेकाञ्चोल्लेखो कविना सूक्ष्मपर्यावरणीय दृष्ट्या कृतमस्ति। तद्यथा–

**तृणोत्करैरुद्गतकोमलांकुरैर्विचित्रनीलैर्हरिणीमुखक्षतैः।**
**वनानि बैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः।।**[१]

कविकुलगुरुः कालिदासो मानवीयसुखदुःखक्रान्तायां प्रकृतौ मानवसुलभभावक्रियाव्यापारस्यापि निदर्शनं यत्र तत्र स्व काव्येषु प्रदर्शितवान्नस्ति। तस्य ऋतुसंहारकाव्यमपि तथ्यस्य नास्त्यपवादस्वरूपमित्यवलोक्यते। तृतीयसर्गे शरत्कालवर्णनप्रसंगे आकाशं लक्षयन्नुपमालंकारालंकृतेऽस्मिन् श्लोके– कविः कथयति–

**व्योम क्वचिद्रजतशङ्खमृणालगौरै–**
**स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः।**
**संलक्ष्यते पवनवेगचलैः पयोदै**
**राजेव चामरशतैरुपवीज्यमानः।।**[२]

अत्र मेघः मानवोचित क्रियाकरोति, अतः मानवीयकरणपर्यावरणस्योदाहरणेऽयं श्लोकः समागच्छति। एवमेव षष्ठसर्गे वसन्तवर्णनप्रसङ्गे कविः प्रकृतौ मानवीकरणकुर्वन्नवलोक्यतेः –

**प्रफुल्लचूताङ्कुर तीक्ष्ण सायको द्विरेफमालाविलसद्धनुर्गुणः।**
**मनांसि भेत्तुंसुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये।।**[३]

अत्र वसन्ते वीरोचितकार्यस्य वर्णनं विद्यते। वक्ता स्वप्रियतमायाः समक्षं वसन्तर्तोः वर्धनं योद्धारूपेण करोति। इति।

### ❖ "अभिज्ञानशाकुन्तलम्" नाटकस्य पर्यावरणदृष्ट्या वैशिष्ट्यम्।

अभिज्ञानशाकुन्तलम् इति नाटकं न केवलं काव्यरसरसज्ञान् सहृदयान् कर्षयति अपि तु काव्यसौन्दर्यबलेन विदेशियानपि सरलता विमोह्यति। नाटकेनानेनैवातिशयप्रभावितः जर्मनमहाकविर्गेटे महोदयो मुक्त कण्ठेन कालिदासप्रशंसायामुद्द्घोषितवान् तस्य छात्राचित्रंमत्रप्रस्तूयते–

---

१. ऋतुसंहार – २/८, २. – ३/४, ३. –६/१

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्

यच्चान्यन् मनसो रसायनमतः सन्तर्पणं मोहनम्।

एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलूकयो

रैश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्।।

(महाकविः कालिदासः पृ.९५ ले. डॉ. रामजी उपाध्यायः)

शाकुन्तलस्य मङ्गलाचरणे स्वेष्टदेवस्य भगवतः शङ्करस्य दिव्याष्टमूर्तीनां मङ्गलमाचरति–

**या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**

**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहुः सर्वबीजपकृतिरिति यया प्राणिनः प्राणिनः प्राणवन्तः**

**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।**[1]

अस्मिन् श्लोकेऽपि पर्यावरणस्य मुख्यकारकाणां दर्शनमनायाशेन भवति। तद्यथा– सूर्यस्य चन्द्रमसश्च पर्यावरणशुद्ध्यै महत्त्वं को न जानाति। यजमानः यज्ञ द्वारा पर्यावरणं शोधयति तथा हवनीयान् पदार्थानादाय देवान् प्रति नयति च। पुनश्च पञ्च महाभूताः साम्यत्वेन पञ्चीकरणतया स्थितिं दधति।नाद्यन्ते सूत्रधारः मञ्चे आगत्य ग्रष्मिर्तोः स्वाभाविकं वर्णनं करोति। यथा–

**सुभगसलिलागाहाः पाटलसंसर्गसुरभिवनावाताः।**

**प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः।।**[2]

मूलतस्तु कालिदासो भारतीय संस्कृतेः समुपासकोऽस्ति। भारतीयसंस्कृतेर्विकासोऽपि यथार्थतस्तपोवनादेव सञ्जातः अतस्तपोवनानि प्रति तस्याकर्षणं नैसर्गिकमेव। त्यागतपस्यादिगुणमण्डितायाः भारतीयसंस्कृतेः जनकानि परमपूतानि तपोवनानि प्रतीयन्ते। पर्यावरणस्य पोषणमपि– अधिकं तपोवने भवति, एतदेवकारणमस्ति यत् कालिदासेन वर्णितं तपोवनं सजीवतया सहृदयपाठकानां नेत्रगोचरतामधिगत्य तेषां मानुषकालुष्य प्रक्षालयदिव शोभते। शाकुन्तलस्य प्रथमोङ्के "महर्षिः कण्वाश्रमोऽयमिति"

१. अभिज्ञानशाकुन्तल –१/१, २. –१/३,

विज्ञाय राजा आश्रमस्य सजीवमाह्लादजनकं चित्रं प्रस्तौति, यत्रपर्यावरणसंरक्षणस्योत्तममुदाहरणं वयं पश्यामः। यथा–

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः,**

**प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।**

**विश्वासोपगमादभिन्नगतयःशब्दंसहन्तेमृगा–**

**स्तोयाधारपथाश्चवल्कलशिखानिष्यन्दरेखाङ्किताः।।१/१४।।**

अर्थात–कोटरमध्यवर्तिभिः शुकैः पातिताः मुनिधान्यकणाः क्वचित् वृक्षतले दृश्यन्ते। क्वचित् तापसतरुफलभेदिकाः प्रस्निग्धाः प्रस्तराः दृश्यन्ते। कुत्रचित् लब्धविश्वासा अविकृतसञ्चाराः हरिणाः रथध्वनिं सुखेन शृण्वन्ति। जलाशयानां पन्थानो वल्कलाग्र–निष्यन्द–जलधारया रेखाङ्किता लक्ष्यन्ते। एतादृशं तपोवनसम्बन्धिवर्णनं कस्य मनो न मोदयति। अर्थात् केवलं मानवानां नैव परन्तु पशुपक्षीणामपि मनांसि हरति। अत्र तपोवने जीवहिंसा न भवति, तेषां रक्षा तपोवनजनैः पुत्रवत् क्रियते, अतः ते मृगादि पशवः निर्भयो भूत्वा इतस्ततः विचरणं कुर्वन्ति। अन्यच्च– चतुर्थोऽङ्के शकुन्तलायाः पतिगेहं प्रस्थितायाः वसनाञ्चलंगृहित्वाऽऽकर्षयन्तं मृगशिशुमवलोक्य महषि कण्वः कथयति–वत्से!

**यस्य त्वया व्रणविरोपणमिङ्गुदीनां,**

**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।**

**श्यामाकमुष्टिपरिवर्धितको जहाति,**

**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।**[१]

अर्थात्–दयार्द्रहृदया त्वया दर्भांकुरभक्षणक्षतमुखस्य यस्य मृगशावकस्य मुखाभ्यन्तरे इङ्गुदीतैलं निक्षिप्य व्रणः शोषितः स्वयमत्तुमसमर्थस्य तन्मुखे मुष्टिपरिमितंश्यामकं प्रक्षिप्य पुत्रवत्पालितश्च सोऽयं मृगशिशुः यादृशी त्वद्विरहदुखितः ते वसनं न त्यजति। अत्र जीवजन्तून् प्रति वात्सल्यभावना दृश्यते, तादृशी अन्यत्र नैव प्राप्यते। एषः श्लोकः पर्यावरणे पशुसंरक्षणस्योत्तममुदाहरणं वर्तते।

---

१. अभिज्ञानशाकुन्तल – ४/१३

महाकविः पर्यावरणे मानवीयव्यवहारमपि स्थापितवान्। प्रथमोऽङ्के – अनुसूया शकुन्तलां सम्बोध्य कथयति यत्– "**हला शकुन्तले ! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति। नवमालिका।**" (१/पृ.३८)

अत्र प्रकृतौ मानवीय वृतेश्चारोपः पर्यावरणवर्णनस्य महद् वैशिष्ट्यम्। अस्मिन् नाटके जायमानानां वृक्षसम्बन्धि वर्णनानां दर्शनेन विदितं भवति, यन्मानवजीवने नित्यं प्रति जायमानेषु व्यवहारेषु वृक्षाणामुपयोगित्वादस्त्येव समधिकं महत्त्वम्। क्वचित्तु आश्रम प्रासादे इव निरूपिताः सन्ति, यदा राजा सर्वप्रथममागच्छति तपोवने अनुसूयादीनां समक्ष तदा ताः कथयन्ति– "**तेन ह्यस्या प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्त्तमुपविश्य परिश्रमविनोदं करोत्वार्यः।**"(**अभि.१/पृ.४७**) अन्यत्रापि आश्रमे वस्तूनां स्थापने, पूजा सविधाने पुष्प–पल्लव प्रदानेन पूजाकर्मणि सदुपयोगिता दृश्यत एव वृक्षाणाम्। ते तत्र चेतनप्राणिनः इव व्यवहारन्तो जनैरवलोक्यन्ते। शकुन्तलायाः पतिगृह गमनेन परं व्यथितालताः पीतपत्रव्याजेनाश्रूणि विमुचन्त्यः सर्वेषां दृष्टिपथमायान्ति।

**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।**[१]

वृक्षाः सहोदरत्वं प्रदर्शसन्तः शकुन्तला प्रस्थानवेलायां विद्यमाना अपि भ्रातृकर्तव्यं न विस्मरन्ति, तस्याः कृते नानाभरणवस्त्रादिवस्तूनिप्रयच्छन्तः मुनेर्मर्यादामपि रक्षन्ति। यथा–

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं ,**

**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।**

**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–**

**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।**[२]

अर्थात्– महर्षेः कण्वस्य कथनानुसारेण केनचिद् वृक्षेण चन्द्रधवलं पदांशुकं दत्तम्। केनचिद् स्त्रीणां चरणरञ्जनोपयुक्तं लाक्षाद्रवं उद्गीर्णः, तथा अपरेभ्यो पल्लरागताम्रेभ्यो वनदेवता करतलेभ्यः विभिन्नानि महर्घाणि रत्नानि अस्मद्धस्ते समागतानि। शकुन्तलापि पूर्वं सहकारतरुविषये कथयति– "**यदि इमं विस्मरामि तदा स्वात्मानमपि विस्मरेयम्।**"(**१/३९**) लताविषयेऽपि स्पष्टवक्ति यदत्र मे भगिनिकास्नेहः तस्या मनसि वृक्षा लताश्चभातृभगिनिकातुल्या वर्तन्ते। चतुर्थोऽङ्के शकुन्तला पतिगृहं गच्छति, तदानीं वृक्षैः

---

१. अभिज्ञानशाकुन्तल –४/१, २. – ४/४,

कृतं पूर्वव्यवहारं विज्ञापयन्कण्वः तेषाम् अनुज्ञा याचते। यथा–

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**

**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।अभि. ४/८।।**

अत्र चेतनेष्वपि वृक्षेषु शकुन्तलायाश्चेतनव्यवहारप्रदर्शितोऽस्ति। वृक्षाणां शकुन्तलायाः सातिशयः स्नेहोऽथवा श्रेष्ठत्वं प्रदर्शिमस्ति। यतो हि सा पूर्वं वृक्षान् पाययति, ततः स्वयं पातुं प्रवृत्ताभवति। आश्रमवासिनी सा यद्यपि वर्तते आभूषणप्रिया, तथापि स्नेहातिरेकेण वृक्षाणां पल्लवान् न त्रोटयति,मनुष्याणामिव तेषां दुःखसम्भावनात्। यथा लोके कस्यापि पुत्रप्राप्तौ समुत्सवविधानं भवति, तथैवतत्राश्रमे वृक्षसमुदाये यत्र कुत्रापि यस्य कस्यापि च प्रथमपुष्पोद्गमोजायते तदा शकुन्तला हर्षप्रफुल्लिताभवति। शकुन्तलायाः गमनकाले शकुन्तलावियोगविधुराप्रियम्वदाऽनुसूयादि सखीवर्गौ एकतो विलपंत्यपरतोखिला तपोवनप्रकृतिः व्याथिता सति भोजन नर्तनादि– व्यवहारं त्यजति। यथा–

**उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।।**[१]

अर्थात्– शकुन्तला वियोगेन इमे आश्रमस्था सर्वे जीवाः अपि कातरादृश्यन्ते। कण्वः शकुन्तलां कथयति– अवलोक्य त्वया प्रदत्ताभिः नीवारममुष्मिभिः संवर्द्धिता हरिण्यः चर्वितमपि दर्भाङ्कुरग्रासं मुखादुद्गिरन्त्यः मौनमासते। निजनर्तनैः त्वां विनोदन्तो मयूराः अपि विस्मृतनृत्याः स्तब्धाः सन्ति।तत्रैव शकुन्तला स्वप्रस्थानकाले पितुराज्ञामवाप्यवनज्योत्स्नामुपेत्य तां समालिङ्ग्य कथयति– **"वनज्योत्स्ने चूतसंगतापि मां प्रत्यालिङ्गेतोगताभिः शाखावाहाभिः अद्य प्रभृति दुरपरिवर्तिनी भविष्यमि। तात! अहमिवेयं त्वया चिन्तनीया।"**[२]

अर्थात्– विटपबाहुभिः मां परिषजस्व, अस्मात् दूरतरनगरगामिनी दूरस्था भविष्यामि। अनेन – मत्कृते क्षणमपि ते चूतवियोगः माभूदिति तत्रैव वियोग विधुरं मृगशावकं कथं कथमपि धैर्यमवलम्ब्य शकुन्तला तमाश्वासयन्ती कथयति। तद्यथा– **"वत्स किं सहवास परित्यागिनीं मामनुसरसि अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तष्व तावत्।"**[३]

१. अभिज्ञानशाकुतल –४/११, २. –४/पृ. १९८, ३. –१./पृ. २०२

अर्थात्– स्नेहपरवशा शकुन्तला तमौरसपुत्रवत् लालयन्तीसविषादमाह वत्स किमर्थं तवाश्रमवासिनाच सहवासं विहाय पतिगेहं गच्छतिं मामनुसरसि, वृथैव कि स्नेहबन्धनमनुबघ्नासि। मद्वियोगकाले मया विरहितं भवन्तं ममपिता कण्वः पालयिष्यति। आश्रमपदं गच्छ। अतस्तव निवर्तनमेव श्रेयः। एतादृशी– अभिज्ञानशाकुन्तले– या प्रााकृतिकी सुषमा प्रस्तुता सा कवितारसज्ञानां सहृदयानां मनांसि आत्मनं प्रति सरलतया आकर्षयति।

नाटकस्य षष्ठेऽङ्के प्रमदवनस्य वसन्तर्तोः शोभामण्डितं दृश्यं गोचरी भवति। धीवरमाध्यमेन शकुन्तलायाः स्मृतिचिह्नं मुद्रिकां प्राप्य राजा धैर्यच्युतोऽस्ति। अतएव तेन वसन्तोत्सवः प्रतिषिद्धः। राज्ञः मनोभावमनुसरन्तः प्रजाजनाः मदनोत्सवं नारम्भन्ते। वासन्तिकैः तरुभिरपि देवस्य शासनं प्रमाणी कृतम्। एवं रसालकलिका परागं न धत्ते कुरबककुसुममपि कोरकरूपेणावस्थितः तिष्ठति। पुंस्कोकिलस्य कूजनं तस्य कण्ठेऽवरुद्धम्। किं बहुना कामदेपोऽपि स्वकीयं शरंनिषङ्गे निक्षिपति। इदं सर्व नृपदुष्यन्तस्य प्रतापमात्रेण नास्ति परं मानवस्य प्रकृतेश्च सुखदुःखयो सहभागितया संभवति।पर्यावरणसंरक्षणे संतुलने च सामान्यजनैः सह राज्ञः सहयोगोऽपि वाञ्छनीयः। यदा राजा यज्ञेन इन्द्रंप्रीणाति तदा इन्द्रोऽपि काले वृष्टिं यच्छति प्रभूतजलवर्षणेन च भूलोकं पुष्यति। मारिचस्य – आशीर्वचनेषु परस्पर सहयोगस्यायं सिद्धान्तोऽस्ति। यथा–

**तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु**

**त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व।।७/३४।।**

अपि च कविः कालिदासः अस्य नाटकस्य भरतवाक्यस्य प्रथमे चरणे **"प्रवर्ततां प्रकृतिहिताय पार्थिवः।।७/३५।।**कथयित्वा राजानं प्रेरयति।नृपार्थे पार्थिव शब्दस्य प्रयोगोऽत्र सर्वथा सार्थकः। राजा 'पृथिवी–पतीः' भवति तस्याः रक्षणं तस्य परमं कर्तव्यम्। पृथिव्याः प्राकृतिकपर्यावरणस्य तत्रस्थानां जनानाञ्च रक्षाभारं नृपस्योपरि भवति। 'प्रकृति हिताय' इति समस्तपदेन प्रकृतिहित करणाय प्रेरणा दत्ता। प्रकृति शब्देन प्रजाः पर्यावरणञ्च उभे अभिधीयेते। राजा प्रजायाः हितं कर्तुम् प्रवृत्तिमान् भवतु न त्वात्मतुष्टये यदा राजा पर्यावरणस्य रक्षायै प्रयत्नशीलो भवति तर्हि जनाः अपि तमनुसरन्ति तस्य आदेशानां पालनं कुर्वन्ति। अद्यत्वे अस्माकं पृथिवी प्रदूषणभाराक्रान्ता लोकतन्त्रस्य प्रतिनिधयः तैः तैः प्रयत्नैः तां रक्षेयुः इति आशास्महे।

एवम् अभिज्ञानशाकुन्तले प्रकृतिः कदापि मानवजीवनस्य प्रतिकूलं नाचरति। मानवस्य प्रकृतेश्च पूर्णसामञ्जस्यमेवात्र दृश्यते। एकेन विना अन्यस्य कल्पनापि न संभवा। प्रकृतिः अत्र मनुष्यस्य सुखे विहसति दुखेः च रोदति। समासेन वक्तुं शक्यते यत् एष महाकविः प्रकृतिचित्रणे संरक्षणे च दक्षोऽस्ति।

## ❖ विक्रमोर्वशीयम् नाटकस्य पर्यावरणदृष्ट्या वैशिष्ट्यम् ।

अस्मिन् नाटके कथासन्दर्भादि काव्य वैभवमतिमात्रंरमणीयं वर्तते। नाटकेऽस्मिन् सहृदयहृद्द्रावीणि सन्ति–अनेकानि मधुराणि पद्यानि । विशेषतश्च अन्तिमाऽङ्के विरहविधुरस्य राज्ञः असन्निहिति प्रेयसी समन्वेषण प्रकारस्तु संचेतसां सम्मोहनमेव।

नाटकेस्मिन् यत्र तत्र न्यूनाधिकमात्रायां पर्यावरणचित्रणमपि दृश्यते। कालिदासस्योपमावैशिष्ट्यद्योतकम् प्रकृतिमाध्यमेनालंकारविधानं तु प्राचुर्येणास्त्येवात्र, सहैवालम्बनोद्दीपन मानवीकरणरूपात्मकस्यापि पर्यावरणचित्रणस्य संक्षिप्तसंकेतः क्वचित्कचिदत्र नाटकेऽस्माकं दृष्टिपथे समायाति। तथद्या–द्वितीयाऽङ्के प्रमदवने वसन्तप्रभावन्निरूपयन्राजा कथयति–

**अग्रेस्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयोः,**
**रक्ताशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति।**
**ईषद्बद्धरजः कणाग्रकपिशा चूते नवा मञ्जरी,**
**मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्री स्थिता।।**[१]

अन्यच्च–पुनर्ग्रीष्मप्रभावं व्याप्तमेकत्र राजा कथयति–

**उष्णालुः शिशिरे निषीदति तरो मूलालवाले शिखी,**
**निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः।**

**तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते,**

**क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ।।२/७।।**

अस्मिन्नेवाऽङ्के नायक–नायिकारूपेण वर्णिता प्रकृतिर्विभाभाव्यते। तद्यथा–

१. विक्रमोर्वशीयम् –२/७,

निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दी च लासयन्।

स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे।।[१]

दक्षिणमारुतेन प्रत्यद्गते राज्ञे पवनः कामुकमिव प्रतिभाति। प्रकृतेर्मानवीकरणवर्णन द्रष्टव्यम्। यथा–

**विद्युल्लेखा कनकरुचिरं श्री वितानं ममाभ्रं,**

**व्याधूयन्ते निचुलतरुभिर्मञ्जरी– चामराणि।**

**धर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा,**

**धारासारोपनयनपरा नैगमाः सानुमन्तः।।[२]**

अस्मिन्नाटके– उद्दीपनरूपात्मकप्रकृति चित्रणस्य बाहुल्यं दृश्यते। एतादृशं प्रकृतिचित्रणं प्रायशो नायकनायिकोवियोगावस्थायामेव प्रकृतिवस्तुदर्शनात्सवेत्रोद् भूतमस्ति। उर्वशीवियोगे –पुरूरवा कथयति–

**आदर्शनात्प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम्।**

**बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन।।२/२।।**

अस्मिन् नाटके कालिदासः प्रतीकात्मकेरूपे पर्यावरणस्य कलापूर्ण निरूपणं कृतवान्नस्ति।

### ❖ मालविकाग्निमित्रंनाटकस्य पर्यावरणदृष्ट्या वैशिष्ट्यम्।

अस्मिन् नाटके शुंगवंशीयनरपतेरग्निमित्रस्य विदर्भराजकुमार्याः मालविकायाश्च प्रेमकथोपनिबद्धास्ति। एतयोरेव नायकनायिकोर्नाम्ना नाटकस्य नामकरणमपि कृतमस्ति। अस्मिन् नाटके अन्यनाट्यकृत्यपेक्षया प्रकृतिचित्रणस्य समावेशोऽतिस्वल्पो विद्यते। मानवीकरणरूपेण नाटकेस्मिन् क्वचित् क्वचित् प्रकृतिचित्रणं दृष्टिपथे समायाति। यथा तृतीयाऽङ्के विदूषकराज्ञोर्वार्तालापः वयंश्रृणुयामः–

विदूषकः – नन्वेतत्प्रमदवने पवनगलचलाभि पल्लवांगुलिभिः त्वरयतीव भवन्तं प्रवेष्टुम्।राजा–

---

१.विक्रमोर्वशीयम् – २/४, २. – ४/१३

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां

सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव।

अंगे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे

सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन।।[1]

अत्र प्रमदवने आह्वानक्रियायाः वसन्ते च प्रश्नकर्तृकत्व हस्तक्रियाव्यापारयोरारोपः सुष्पष्टं लक्ष्यते यतः उपरिचर्चितावुभौमानवोचितौ क्रियाव्यापारौ मानवेष्वेव शभ्यौस्तः। विन्ध्यक्षेत्रे धाराप्रवाह जलवर्षशीला विद्युन्मयी मेघमालाया आलंकारिकवर्णनम्। यथा—

बाष्पासाराहेमकाञ्चीगुणेन, श्रोणीबिम्बादप्युपेक्षाच्युतेन।

चण्डी चण्डं हन्तुमभ्युद्यता मां विद्युद्दाम्ना मेघराजीव विन्ध्यम्।।माल.३/२१।।

द्वितीयाकंस्य मध्याह्नवर्णनप्रसङ्गे— आलम्बनरूपात्मकं प्रकृतिचित्रणं वैतालिकमुखेन। यथा—

पत्रच्छायासु हंसा मुकुलितनयना वीर्धिकापद्मिनीनां,

सौधान्यत्यर्थतापाद्वल भिपरिचयद्वेषि पारावतानि।

बिन्दुक्षेपान्पिपासुः परिसरतिशिखी भ्रान्तिमवारियन्त्रं,

सर्वैं रुस्रैः समग्रैस्त्वमिव नृपगुणैर्दीव्यते सप्तसप्तिः।।[2]

अत्र उपमालंकारविन्यासपूर्वकं प्रचण्डसूर्यातपस्यात्यर्थं प्रभावोत्पादकत्वं वर्णितमस्ति। वसन्तर्तौ कुरबकरजैः सुशोभितः किसलयपुटस्थजलकणैः शीतलमयवायुकम्पितोपवन वृक्षाः सन्तापनिवारणार्थं — आमन्त्रिता इव प्रतीयन्ते। तद्यथा —

वोढा कुरबकरजसां किसलयपुटभेदशीकरानुगतः।

अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ।।[3]

सर्वविधेषु प्राकृतिकचित्रणेषु अलंकारविधानरूपप्रकृतिचित्रणस्यैवप्राचुर्यं दृश्यते। सर्वत्र प्रकृतिचित्रणे पर्यावरणस्य दर्शनं भवति। तद्यथा—

---

१. मालविकाग्निमित्रम् — ३/४, २.—२/१२, ३. —३/९

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।

जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य।।१/६।।

निष्कर्षः –

अन्ते निष्कर्षतः कथयितुं शक्यते यद् पर्यावरणस्य महत्ता विषयकं ज्ञानं कवेरद्भूतमासीत्। तेषु ग्रन्थेषु वनसंरक्षेण सह पर्यावरणसंरक्षणज्ञानमपि उपलभ्यते। तस्य नाटकीयपात्रेषु तु पर्यावरणविषयकं विशिष्टविज्ञानं परिलक्ष्यते। नाटकस्य प्रथमाङ्के – एव शकुन्तला वृक्षाणि सिञ्चन्ती दृश्यते। सा प्रयोजनं विना वृक्षस्य पत्रमेकमपि न गृह्णाति। लतां प्रति तस्या भगिनिका स्नेहो दृश्यते। तया आश्रममृगाः पुत्रवत् पालिताः। लतापुष्पाणि तस्य हृदि प्रसन्नतां जनयन्ति।नायक–नायिका अन्ये पात्राणि च पर्यावरणसंरक्षणे शिक्षिता इव दृश्यन्ते। कौमारे पार्वती 'अपर्णा' इति नाम्नि प्रसिद्धा। रघुवंशमाहाकावयस्य सर्वे नेतारः तपोवनं गत्वा पर्यावरणसंक्षणस्य ज्ञानं प्राप्नुवन्ति । कालिदासग्रन्थानांपरिशीलनेनानुमीयते यद् स वनस्पतिविज्ञानविदासीत्। अद्यागतानां पर्यावरणप्रदूषणविषयकमापदां तस्मिन् काले एव काव्यमाध्यमेन संकेतितम्।